CC-O. In Public Domain. Digitized by eGangotri

विद्या गाईड

न्याय-सिद्धांत-मुक्तावली-दीपीका

प्रत्यक्ष - खण्ड

(प्रश्नोत्तरी)

सम्पादक :-

आचार्य श्री जयकान्त झा "बख्शी"

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

न्याय-सिद्धान्त-मुक्तावली-दीपिका

प्रत्यक्षखण्डम्

(प्रश्नोत्तरीयम्)

दीपिकाकारः सम्पादकश्च

आचार्य श्री जयकान्त झा "बख्शी"

प्रधानाध्यापकः

शारदामन्दिर सं० विद्यालय ढंगा-हरिपुर बख्शीटोल

जि० मधुबनी - (बिहार)

प्रकाशकः

भारतीय विद्या प्रकाशन

वाराणसी Sri Vidyabharathi Book Centre, Sringeri दिल्ली

प्रकाशक :—

भारतीय विद्या प्रकाशन

पो० बा० नं० ११०८ कचौड़ीगली, वाराणसी–२२१००१

१ यू० बी० बँगलोरोड, जवाहर नगर, दिल्ली–११०००७

CC-0. In Public Domain. Digitized by eGangotri

अन्यप्राप्ति स्थान :—

भारतीय बुक कारपोरेशन

१ यू० बी० बँगलोरोड, जवाहर नगर, दिल्ली–११०००७

मूल्य

प्रथम संस्करण—१९८८

द्वितीय संस्करण–१९९१

: निवेदन :

छात्रों की सुविधा के लिए अन्य गाइडों तथा प्रश्नोत्तरियों का भी प्रकाशन किया गया है। प्रत्येक वर्षों की भाँति इस बार भी सफलता के लिए 'भारतीय विद्या प्रकाशन' की ही गाइडों का चयन करें।

मुद्रक—"राजप्रेस" पाटनदरवाजा (गायघाट), वाराणसी।

फोन नं०–३३१०/३

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नानुक्रमणिका

प्रश्नाः		पृष्ठाङ्काः
१.	न्यायसिद्धान्तमुक्तावलीकारः कः ? तस्य संक्षेपण परिचयो देयः	१
२.	न्याय-सिद्धान्त-मुक्तावली केन रचिता ? अस्याः किं वैशिष्ट्यम् ?	२
३.	चूडामणीकृतेत्यत्र समाप्तपुनरात्तत्वदोषमुपपाद्य निरस्यताम् ।	२
४.	न्यायसिद्धान्तमुक्तावल्या अनुबन्धचतुष्टयं प्रतिपाद्य 'संसारम-हीरुहस्य बीजाय' इति कारिकाऽशं व्याख्याय ईश्वरास्तित्वं संसाधनीयम् । (१९८६)	३
५.	विघ्नविघाताय कृतं मङ्गलमित्यत्र विधातपदस्य कोऽर्थः ?	४
६.	ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिम्प्रति कारणमिति ग्रन्थोत्थाने किं बीजम् । किमेतावता ग्रन्थेन साध्यते ? अत्र समाप्तिपदोपादानस्य च क आशयः ?	४
७.	दिनकरीरीत्या मङ्गलस्य सफलत्वं साध्यताम् । (१९८६)	५
८.	मङ्गलस्य सफलत्वानुमानं कीदृशम् ? प्रकृते तदुपयोगः कः ? तद्धेतुघटकपदानां व्यावृत्तिः का ? कस्तद्धेतुघटकपदार्थः ?	६
९.	प्राचीनमते मङ्गलस्य केन प्रमाणेन किम्फलकत्वम् ? का विघ्नध्वंसावश्यकता ? समाप्तिमंगलयोः कार्यकारणभावः कीदृशा ? कथञ्चान्वयव्यतिरेकव्यभिचारपरिहारः ?	७
१०.	नव्यनां मते मंगलस्य कया युक्त्या किं फलकत्वम् ? मंगलविघ्नध्वंसयोः कार्यकारणभावः कीदृशः ?	८
११.	क्वचिच्चविघ्नात्यन्ताभाव एव समाप्तिसाधनमित्यादिग्रन्थोत्थाने किं बीजम् ? प्रतिबन्धकसंसर्गाभवस्यैव च कार्यजनकत्वकथनेकोऽभिप्रायः ?	९
१२.	न्यायसिद्धान्तमुक्तावल्या अनुबन्धचतुष्टयं प्रतिपाद्य 'संसार-महीरुहस्य बीजाय' इत्यंशंव्याख्याय ईश्वरास्तित्वं संसाधनीयम् । (१९८६)	९
१३.	ईश्वरसत्तायां दिनकरीकारेण किं मानमुपस्थापितमिति सम्यगालोच्यताम् । (१९८६)	१०
१४.	यथा घटादिकार्यं कतृजन्यं तथा क्षित्यंकुरादिकमपि इति विश्वनाथः । अत्र पृच्छ्यते—श्रुतिप्रमाणसत्वेऽनुमानप्रमाणस्य किं प्रयोजनम्	११
१५.	शक्तेः पदार्थान्तरत्वं निरस्यताम् (१९८६) अथवा	११

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नाः पृष्ठाङ्काः

सत्तेः सप्तपदार्थातिरिक्तपदार्थत्वं कया युक्त्या कस्य मतम् ? कथं च तन्निराकरणम् क्व च न्यायनये तस्या अन्तर्भावः ? ११

१६ सादृश्यस्य पदार्थान्तरत्वं निरस्यताम् (१९८६) अथवा

सादृश्यं सप्तपदार्थातिरिक्तपदार्थः इति कया युक्त्या कस्य मतम् ? कथं च तत्खण्डनम् ? १२

१७ ननु द्रव्यत्वजातौ किं मानमिति शंकोत्थाने किं बीजम् ? द्रव्यत्व-जातिसिद्धिप्रकार कः ? संयोगस्यं विभागस्य वेत्यपरपक्षद्वयो-ल्लेखस्य प्रयोजनञ्च किम् ? १३

१८. तमसो दशमद्रव्यत्वमुपपाद्य निरस्यताम्— १४

१९. जातेः सपदकृत्यं लक्षणं किम् ? परस्या अपरस्याश्च **जातेःलक्षणो-दाहरणानि कानि कानि ?** द्रव्यगुणकर्मभिन्नावृत्ति-धर्मत्वस्यैव च कुतो न जातिलक्षणता ? १५

२० **व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः ।**
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः ॥

एतदुक्तजातिबाधकानि परिष्कृत्य तदुदाहरणानि निरूपयन्ताम् । अथवा जातिबाधकाः के ? सोदाहरणं विशदी क्रियताम् । १५

२१. विशेषपदार्थसिद्धौ का युक्तिः ? इति समाधाय सामान्यस्य लक्षणं पदकृत्यमुखेन प्रतिपादनीयम् । (१९८६) १६

२२. विशेषपदार्थस्य निर्दुष्टं लक्षणं किम् ? तदङ्गीकारे का युक्तिः ? तत्र कीदृशं व्यावृत्तत्वम् नवीनमते च तस्यावश्यकता का ? १७

२३. असम्बन्धः जातिबाधक इति दिनकरीरीत्या व्याख्यायताम् । (१९८६) १८

२४. समवायस्य सपदकृत्यं लक्षणं किम् ? समवायसिद्धिप्रकारः कः ? १८

२५. समवायसाधनप्रकारमुपपाद्य तस्य विलक्षणसम्बन्धत्वे किं मानम् ? किञ्च तस्य निर्दुष्टं सपदकृत्यं लक्षणम् ? एवं समवायस्यै-कतया वाय्वादौ रूपादिप्रमाऽऽपत्तिः कुतो न ? तथा अभावस्य वैशिष्ट्यं सम्बन्धान्तरं कुतो न ? इति समुपपाद्यताम् । १९

२६. को नाम अभावः ? कतिविधश्च सः ? प्रत्येकं सलक्षणं सोदाहरणं प्रदर्शयत ? २०

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नाः	पृष्ठाङ्काः
२७. अभावानामधिकरणात्मकत्वमाश्रयसोपपत्तिकं तन्निराकरणं क्रियताम् ।	२१
२८. द्रव्यादिपञ्चानामनेकत्वं समवायित्वञ्च साधर्म्यमवादि तथा गुणादेः गुणशून्यत्वं क्रियारहितत्वञ्च साधर्म्यमवादि तत्र सर्वत्र साधर्म्यस्वरूपं तथा प्रतिपाद्यतां यथा क्वापि दोषो न प्रसज्येत ?	२२
२९. 'पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्' इति करिकांशो व्याख्येयः ?	२३
३०. इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वम्, ज्ञायमानं सामान्यं न प्रत्यासत्तिः, ज्ञायमानलिङ्गं नानुमितिकरणमित्यभिप्रायेणोक्तमिति मूलपाठो व्याख्येयः ।	२३
३१. अणुपरिमाणस्य कथं न कारणत्वमिति विशदमुपपाद्य आत्ममहत्परिमाणस्याकारणत्वमित्याचार्याशयं वदन्तात्पर्यं प्रकाश्य कथञ्च विश्वनाथमते तन्निरासः ? इति समीक्ष्यताम् ।	२४
३२. कारणस्य सपदकृत्यं सामान्यं लक्षणं किम् ? तच्च कतिविधम् ? प्रत्येकं सलक्षणं सोदाहरणञ्च निरूप्यताम् ।	२५
३३. कारणावान्तरभेदाः के ? कानि च तेषां सपदकृत्यानि सोदाहरणानि लक्षणानि ? आत्मविशेषगुणानाञ्च कथमसमवायिकारणत्वं नास्ति ?	२६
३४. अन्यथासिद्धभेदाः कति ? तेषां लक्षणानि उदाहरणानि च कानि तृतीयचतुर्थान्यथासिद्धयोरन्यं प्रतिपूर्ववृत्तिविशेषणस्य तुल्यतया कथन्नाभेदः ?	२७
३५. आत्ममानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात् परममहत्परिमाणस्यापि कारणत्वं कुतो न ?	२८
३६. केषां कीदृशं मूर्तत्वं च साधर्म्यमिति तथा विविच्यतां यथा क्वापि दोषो न प्रसज्येत । परिष्कृतमूर्त्तत्वभूतत्वघटकपदव्यावृत्तिश्च लिख्यताम् ।	२८
३७. अव्याप्यवृत्तित्वं क्षणिकत्वं च किम् ? अव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं च कथं केषां साधर्म्यम् ? योग्यविभुविशेषगुणनाशम्प्रति कस्य केन सम्बन्धेन कारणता ?	२९
३८. चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वादिति ग्रन्थः केनाशयेनोक्तः ? तत्र दीधितिकादीनां [illegible] ?	२९

CC-O. Vasishtha Tripathi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नाः

पृष्ठाङ्काः

३९. चाक्षुषलौकिक-प्रत्यक्ष-विषय-वृत्तिद्रव्यत्वाव्याप्यजातिमत्त्वस्य विवक्षितत्वादिति हेतुना कुत्र कीदृशी शंका निराकृता ? तादृश-हेतुघटकचाक्षुषलौकिकपदयोः व्यावृत्तिश्च का ? ३०

४०. "यद् द्रव्यं यद् द्रव्यध्वंसजन्यत्वदुपादानोपादेय" मितिविश्वनाथः। कथमुत्थितेयं व्याप्तिः ? क्व कथं दृष्टान्तता ? प्रकृतव्याप्तिघटक-पदानां व्यावृत्तिश्च का ? शालग्रामशिलाध्वंसजन्य-नारकीय-शरीरे व्यभिचारश्च कथं वारणीयः ? ३०

४१. पृथिव्याः किं लक्षणम् ? कतिविधा च सा ? इति भेदप्रभेदप्रदर्शन-पुरस्सरं सोपपत्तिकं निरूप्य पृथिवीत्वजातौ मानमुपस्थापयत ? ३१

४२. अवयविनमभ्युपगच्छतां मतमुपपाद्य निरस्य च निजमतेनावयवि-साधनप्रकारः समुपपाद्यताम् ? ३३

४३. पाषाणादीनां पार्थिवत्वमनुमानप्रणाल्या ग्रन्थदिशा संसाध-यीयम् ? (१९८६) ३३

४४. पारिमाडल्यभिन्नपदार्थानां साधर्म्यं स्वाधीनग्रन्थदिशा सम्यक् प्रतिपादनीयम् । (१९८६) ३४

४५. परमाणुसाधनरीतिः का ? ३५

४६. अवयव-साधनरीतिः स्वमतेन समुपपाद्यताम् । ३५

४७. सपदकृत्यं शरीरलक्षणं किम् ? मानवशरीराणां पार्थिवत्वे किं मानम् ? सति पार्थिवत्वमात्रे तत्र कथं पांचभौतिकत्वव्यवहारः ? नृसिंहशरीरे कथं लक्षणसमन्वयः ? वृक्षादीनां च शरीरत्वे किं मानम् ? ३५

४८. घ्राणेन्द्रियस्य पार्थिवत्वं संसाध्य तत्साधकहेतुघटकादव्यावृत्तिर-भिधीयताम् । ३६

४९. जलत्वजातिसिद्धौ दिनकरीरीत्या प्रमाणमुद्भाव्यताम् । (१९८६) ३७

५०. जले शुक्ल एव वर्णः, मधुर एव रसः, शीत एव स्पर्शः इति त्रितयमेव सम्यक् प्रतिपाद्यताम् । ३८

५१. करकादेर्जलत्वसिद्धौ 'यद् द्रव्यध्वंसजन्यमि' त्यादिव्याप्तेः कथमुपयोगिता ? ३८

५२. सुवर्णस्य पार्थिवत्वं निरस्य तस्य तेजसत्वे प्रमाणं प्रदर्शयत । ३९

५३. हेतुघटकपदोपादानफलमुपपाद्यतां चाक्षुषत्वजातित्वे प्रसाध्य प्रमाया दृष्टान्तत्वपक्षे द्वितीयपरकीयपदप्रयोजनमभिधीयताम् । ३९

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नाः पृष्ठाङ्काः

५४. पीतिमाश्रयस्यागुत्वपक्षे द्रुतत्वकल्पे च सुवर्णस्य तैजसत्वं प्रसाध्य तत्साधकहेतुघटकपदव्यावृत्तिः का ? कथं नाप्रयोजकता ? किञ्चात्र-पक्षतावच्छेदकम् ? इति समीक्ष्यताम् । ४०

५५. वायौ प्रत्यक्ष-प्रमाणं सम्भवति न वा ? सम्भवति चेत् कथम् ? न सम्भवति चेत् कथम् ? आद्ये तत्साधकानुमानवश्यकता च का ? स्पर्शशब्दवृत्तिकलपैः लिङ्गैः वायोरनुमानप्रणाली च कीदृशी ? ४१

५६. किन्नाम वायुत्वं ? तस्य भेदप्रभेदाश्च के ? वायुत्वजातौ किं प्रमाणम् ? त्वगिन्द्रियस्य वायवीयत्वं कथम् ? सर्वं दिनकरी-रीत्या प्रतिपादयत । ४१

५७. विशेषणासिद्धि-विशेष्यासिद्धिनिराकरणपूर्वकाकाशसाधकानुमानं समुपपाद्यताम् । ४२

५८. कालस्य सपदकृत्यं लक्षणं किम् ? तस्य सद्भावे किं मानम् ? कथं च कालस्यैकत्वे क्षणदिनादिव्यवहारः ? सर्वं दिनकरीरीत्या प्रतिपादयत । ४३

५९. "महाप्रलये क्षणादिव्यवहारो यद्यस्ति तदाऽनायत्या ध्वंसेनोप-पादनीयः" इति विश्वनाथः । अत्र महाप्रलयः कः ? तत्र क्षण-व्यवहारस्य किं प्रयोजनम् ? यदि पदेन किं सूचितम् ? महाप्रलय-वच्च सृष्टिकालेऽपि ध्वंसेनैव कथं न क्षणादिव्यवहारः सर्वं दिन-करीरीत्या प्रतिपादयत । ४४

६०. आत्मत्वजातिसाधनप्रणाली कीदृशी ? सा जातिः जीवेशसा-धारणी न वा ? आद्ये परमेश्वरेऽपि कथं न मुख्याद्युत्पत्तिः ? द्वितीये च परमात्मनो दशमद्रव्यत्वापत्तिः कुतो न ? ४५

६१. चेतनरूपात्मसद्भावे किंमानम् ? कथं तस्य शरीरेन्द्रियाद्यति-रिक्तता ? कथञ्च तस्य नित्यता ? ४५

६२. क्षणिकविज्ञानवादिबौद्धानां मतमुपन्यस्य निराक्रियताम् । ४६

६३. नित्यविज्ञानात्मवादिनां वेदान्तिनां मतमुपपाद्य निराक्रियताम् ? ४७

६४. प्रकृतेः कर्तृत्वं पुरुषस्य च चैतन्यमिति सांख्यकृन्मतमुपपाद्य सयुक्तिकं खण्ड्यताम् ? ४८

६५. "प्रवृत्याद्यनुमेयोऽयं रथगत्येव सारथिः ? इति विश्वनाथः ? अत्र प्रवृत्तिपदार्थः कः ? अनुमानप्रणाली च कीदृशी ? ४९

Sri Vidyabharathi Book Depot, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नः	पृष्ठाङ्काः
६६. परदेहे कथमात्मानुमेयः ? स्वदेहे चायमात्मा कथं प्रत्यक्षगोचरः अत्र दृष्टान्तासिद्धिवारणं कथम् ? सर्वदिनकरीरीत्या प्रतिपादयत ?	४९
६७. बुद्धिः कातिविधा ? अनुभूतिश्च कतिविधा ? कानि च तस्याः करणानि ? प्रत्यक्षलक्षणं च सोदाहरणं सभेदं प्रदर्शयत ?	५०
६८. 'त्वचो योगे मनसाज्ञानकारणम् इति' इति कारिकांशो व्याख्यायताम्? अथवा ज्ञानसामान्ये किं कारणम् ? सप्रमाणं प्रतिपादयत ।	५०
६९. प्रत्यक्षलक्षणमनुमितिलक्षणस्येश्वरप्रत्यक्षेऽव्याप्तिरिति व्याप्तिश्चानुमित्यादौ न प्रसज्येत, नापद्येत चानुमितिलक्षणस्य प्रत्यक्षेऽतिव्याप्तिः ?	५१
७०. बहिरिन्द्रियद्रव्यप्रत्यक्षमात्रे किं कारणमिति प्राच्यनव्यमतेन विविच्ययाम् ?	५१
७१. जन्यज्ञानसामान्ये किं कारणमिति सोपपत्तिकमुपपाद्यताम् ?	५२
७२. निर्विकल्पकज्ञानस्यावश्यकता का ? कथं तस्यातीन्द्रियत्वम् ? किं तस्य लक्षणम् ? कस्तस्याकारः ? कथञ्च तस्य निर्विषयता ?	५२
७३. षडविध-प्रत्यक्षे महत्वस्य हेतुत्वं विविच्यताम् ?	५३
७४. इन्द्रियत्वं कथन्न जातिः ? किं च तस्य सपदकृत्यं लक्षणम् ?	५३
७५. पृथिवीपरमाणोः पृथिवीत्वस्य वायौ सत्तायाश्च चाक्षुषप्रत्यक्षापत्तिः कथम् ? कथञ्च तत्परिहारः ? समवायस्य वैशेषिकमते कथमप्रत्यक्षता ? कथञ्च नैयायिकमते प्रत्यक्षता ?	५४
७६. अभावप्रत्यक्षे योग्याऽनुपलब्धेः कारणत्वं प्रतिपादयत ?	५५
७७. अलौकिकः सन्निकर्षः कतिविधः ? इति सोदाहरणं सोपपत्तिकं निरूपयत ?	५६
७८. सामान्यलक्षण-ज्ञानलक्षणयोः को भेदः ? तदन्यतराऽस्वीकारे का हानिरिति स्पष्टं प्रतिपादयत ?	५६
७९. सामान्यलक्षणः कः ? तत्र सामान्यपदस्य लक्षणपदस्य च कोऽर्थः ? तस्य स्वरूपं किम् ? तेन कुत्र कीदृशं ज्ञानं जायते ? कथं च सामान्यज्ञानस्य सामान्यलक्षणत्वम् ?	५७
८०. ज्ञानलक्षणा का सा किं स्वरूपा ? तस्याः सन्निकर्षत्वाङ्गीकारे च का युक्तिः ? योगसन्निकर्षस्य च कस्मिन् पदार्थेऽन्तर्भावः ?	५८

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीः ॥

न्याय-सिद्धान्त-मुक्तावली-दीपिका

(प्रश्नोत्तरीयम्)

प्रत्यक्षखण्डम्

प्रश्नः १—न्यायसिद्धान्तमुक्तावलीकारः कः ? तस्य संक्षेपेण परिचयो देयः।

उत्तरम्—महामहोपाध्याय-विश्वनाथपंचाननभट्टाचार्यः न्यायसिद्धान्तमुक्तावलीकार आसीत्। तर्कविद्यार्णवपारंगतोऽसौ न्यायशास्त्रस्य अद्वितीयः प्रतिनिधिरासीदित्यत्र सर्वेऽपि तार्किकाः गवेषकाः ऐतिहासिकाश्चैकमत्यमावहन्ति। तर्कविद्यविशारदोऽसौ स्वकीयनव्यन्यायशास्त्रीय प्रखरपाण्डित्येन तर्कशास्त्रस्य सर्वोपादेयतामाकलय्य तर्कशास्त्रमधिजिगांसूनां कृते सकलशास्त्रतत्त्वाधिगमाय नव्य-न्याय-सारभूतां न्याय-सिद्धान्तमुक्तावलीं विलिख्य षोडशशकाब्दभवान् सर्वानपि नैयायिकानतिशयानः सर्वातिशातिनीं प्रतिष्ठां प्राप्तवान्।

समय :—यहामहोपाध्यायोऽसौ रत्नाकर विद्यावाचस्पतेः पौत्रः विद्यानिवासभट्टाचार्यस्य पुत्रः रुद्रन्याय वाचस्पतेर्नारायणभट्टाचार्यस्य च भ्राता १५५६ शालिवाहनशके बंगदेशे प्रख्याततार्किक आसीत्। एतस्यैव ज्येष्ठ पितृव्यो वासुदेवसार्वभौम आसीद्यस्य शिष्यस्तत्त्वचिन्तामणि दीधितिकारो रघुनाथतार्किकशिरोमणिः, स्मृतितत्त्वस्य कर्ता म० म० रघुनन्दनभट्टाचार्यः, गौरांग-महाप्रभुः तान्त्रिकः कृष्णानन्दश्च बभूवुः।

विश्वनाथ भट्टाचार्यकृता ग्रन्था :—

१—कारिकावली

२—न्यायसिद्धान्तमुक्तावली

३—मासतत्त्वविवेकः

४—न्यायसूत्रवृत्तिः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

एते सत्तारो ग्रन्था मुद्रिताः सन्ति, इदानीमुपलभ्यन्ते च ।

प्रश्नः २—न्याय-सिद्धान्त-मुक्तावली केन रचिता ? अस्याः किं वैशिष्टयम् ?

उत्तरम्—न्याय सिद्धान्तमुक्तावली बंग-प्रदेशवासिना महामहोपाध्याय—विश्वनाथपञ्चाननभट्टाचार्येण निजनिर्मितां कारिकावलीं विशदीकर्त्तुं तस्याहीकारूपेण रचिता ।

मुक्तावल्या वैशिष्टयम्—

विश्वस्मिन्नस्मिन् न्याय-नये सप्तैवपदार्थाः सन्ति, ते च द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावरूपाः सन्ति । एतेषां सप्तपदार्थानां परिचयन्तरेण सर्वशास्त्र-प्रदीपरूपस्य दर्शनशास्त्रस्य ज्ञानं नितरामसम्भवम् । अतो दर्शनशास्त्रस्य तत्त्वज्ञानाय अतिसरलया सरण्या द्रव्यादिसप्तपदार्थानां सयुक्तिकं ज्ञापनमेव मुक्तावल्या वैशिष्टयम् ।

प्रश्नः ३—चूड़ामणीकृतेत्यत्र समाप्तपुनरात्तत्वदोषमुपपाद्य निरस्यताम् ।

उत्तरम्—क्रियाऽन्वयेन शान्ताकांक्षस्य विशेष्यवाचकपदस्य विशेषणान्ताऽन्वयार्थं पुनरनुसन्धानं समाप्तपुनरात्तत्वं नाम काव्यदोषः । प्रकृते हि—

"चूड़ामणी कृतविधुर्वलयी कृतवासुकिः ।
भवो भवतुभव्याय लीलाताण्डवपण्डितः ॥"

इत्यत्र 'भवो भव्याय भवतु' इत्येतावताऽन्वयबोधेनैव भवपदस्य शान्ताकांक्षतयोत्तरत्र विद्यमाने 'लीलाताण्डवपण्डित' इति विशेषणस्यान्वयार्थं स भवः पुनः कीदृशः ? इत्याकांक्षासम्पादनाय भवपदेन भवस्मरणस्यावश्यकतया भवति समाप्तपुनरात्तत्वदोषः ।

वस्तुतस्तु नायमत्र समाप्तपुनरात्तत्वदोषः । विधोः किमितिचूड़ामणीकरणम् ? किमर्थं वा वासुकेर्वलयीकरणम् ? इत्याकांक्षायां निराकांक्षप्रतिपत्तिर्न सम्भवति "लीलाताण्डवपण्डित" इति विशेषणाऽनुक्तौ विवक्षिताऽन्वयबोधाभावात् अनियाऽऽकांक्षया विशेषणान्ताऽन्वयस्थले एव समाप्तपुनरात्तत्वदोषस्य प्रसरादिति दिक् ।

Sri Vidyabharathi Book Centre, Sringeri

प्रश्नः ४—न्यायसिद्धान्तमुक्तावल्या अनुबन्धचतुष्टयं प्रतिपाद्य 'संसारम-

CC-0. IIP, Delhi. Digitized by Siddhanta eGangotri

हीरुहस्य बीजाय इति कारिकाऽशं व्याख्याय ईश्वरास्तित्वं संसाधनीयम् ।

(१९८६)

उत्तरम्—(१) न्यायासिद्धान्तमुक्तावल्यां मंगलाचरणप्रसंगे ग्रन्थकारेण सद्द्रव्येत्यादिना द्रव्यादिपदार्थप्रतिपादकत्वप्रदर्शनेन द्रव्यादयः सप्तपदार्थाः ग्रन्थस्य विषया उक्ताः ।

(२) पदार्थतत्वावधारणंच ग्रन्थस्य प्रयोजनमुक्तम् ।

(३) प्रतिपाद्य-प्रतिपादकभावः सम्बन्ध उक्तः ।

(४) पदार्थतत्वावधारणकामो ग्रन्थस्याधिकारी सूचितः । इति ग्रन्थस्यादावेव श्रोतृप्रवृत्तये विषय-प्रायोजन-सम्बन्धाधिकारी रूपमनुबन्धचतुष्टयंसिद्धान्तमुक्तावलोकारेण श्री विश्वनाथपंचाननभट्टाचार्येण प्रतिपादितम् ।

संसारमहीरुहस्य बीजाय—संसार एक महीरुहो वृक्षस्तस्य बीजाय-निमित्तकारणाय (श्री कृष्णाय नमः) इति । कारिकांशोऽयं 'नूतनजलधररुचये - इत्यादि मङ्गलश्लोकस्यान्तिमो भागः ।

सकलप्रपंचहेतोरीश्वरस्य महीरुहबीजत्वमात्रकथनस्याऽनुचितत्वेन 'संसारस्य महीरुहः' इति षष्ठीतत्पुरुषस्य भ्रान्तिं व्यावर्त्तयितुं संसार एव महीरुहः इति कर्मधारयमाह मुक्तावलीकारः । बीजत्वं समवायिकारणत्वं तच्च ईश्वरे बाधितम् अत आह 'निमित्तकारणयेति ।

ननु बीजनाशानन्तरं बीजावयवैरेवाङ्कुरोत्पादात् बीजावयवा एव वृक्षस्य समवायिकरणम् । तथा च 'बीजाय' इत्युक्त्या ईश्वरावयवा जगतः कारणमिति प्रतीयते । तच्च न समीचीनम्, ईश्वरस्य निरवयवत्वात् । अत एव 'बीजाय' इत्यस्यार्थमाह-निमित्तकारणायेति । एतेन ईश्वरे प्रमाणमपिदर्शितं भवतीति ।

ईश्वरस्य अस्तित्वम्—ननु ईश्वरे प्रमाणाभावात् तन्नमस्करणं न समीचीनम् । तथाहि प्रत्यक्षं द्विविधम् बाह्यं मानसंच । तत्र द्रव्यप्रत्यक्षे उद्भूतरूपस्य कारणत्वेन ईश्वरे रूपाभावात् न बाह्यप्रत्यक्ष-प्रसरः, न वा मानसप्रत्यक्षप्रसरः परमात्मनः परेण मनसा प्रत्यक्षवारणायात्ममानसं प्रति परात्मव्यावृत्तविजातीयमनः संयोगत्वेन कारणताऽभ्युपगमात् । नाप्यनुमानं प्रमाणम् ईश्वरस्याप्रत्य-

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

क्षतया तस्य केनचिल्लिंगेन सहचारदर्शनाभावेन व्याप्तिग्रहाभावात्। न वोपमान-प्रमाणम् ईश्वरतुल्यस्य कस्यचिदभावेन सादृश्यज्ञानाभावात्। नापि शब्दः प्रमाणम् श्रुतीनामीश्वरोच्चरितत्वेनैव प्रमाण्यस्य वक्तव्यतया तत्रेश्वरे एवं सन्देहेन श्रुतिप्रामाण्यस्यापि सन्दिग्धत्वादितिचतुर्विध प्रमाणागोचरस्य ईश्वरस्य कथमस्तित्वमिति चेन्न, कार्यं प्रति कृतेःकारणतास्वीकारेण क्षितिः कृतिजन्या कार्यत्वाद् घटवदित्यनुमानेन क्षितेः कृति जन्यत्वसिद्धौ क्षितिजनिका कृतिः यत्किञ्चिदात्मसमवेता, कृतित्वात्, अस्मदादिकृतिवत्, इत्यनुमानेन तादृश-कृत्याश्रयीभूतः कश्चिदात्मा सिद्धचति। सचास्मदादीनां न सम्भवतीति ईश्वरस्य अस्तित्वं सिद्धमेवेति दिक्।

प्रश्नः ५—विघ्नविघाताय कृतं मङ्गलमित्यत्र विघातपदस्य कोऽर्थः ?

उत्तरम्—विशिष्टो धातो विघातः। वैशिष्ट्यं चोत्पत्तिमत्वमेवात्र बोध्यम्। तथा च 'विघात' इति पदस्य 'उत्पत्तिमदभाव एवार्थः।

ननु धातपदमेवोत्पत्तिविशिष्टाभावरूपध्वंसबोधकम् इत्युत्पत्तिमदर्थं कस्य विपदस्य नैष्फल्यमितिचेत्? न, 'सकीचकैर्मारुतपूर्णरन्ध्रै रि' तिमहाकवि-कालिदासीयपद्ये कीचका वेणवस्ते स्युर्यै स्वनन्त्यनिलोद्धता' इति कोशबलेन मारुतपूर्णरन्ध्रत्वविशिष्टवेणुवाचकपदेन मारुतपूर्णरन्ध्रलाभेन मारुतपूर्णरन्ध्रै रित्यस्य वैयर्थ्यभिया 'विशिष्टवाचकपदानां सति पृथग्विशेषण-वाचकपदसमवधाने विशेष्यमात्रपरत्वम्' इत्यवश्यमभ्युपेयम्। ततश्च कीचक-पदस्य वेणुमात्रपरतया मारुतपूर्णरन्ध्रै रित्यस्य न वैयर्थ्यम्। एवं प्रकृते धातपदस्याभावमात्रपरत्वाङ्गीकारेणोत्पत्तिमदर्थस्य विपदस्य न वैयर्थ्यमित्यदो-षात् उपसर्गाणां द्योतकत्वस्यैव नैयायिकाभिमततया शंकाया एवाभावात्। इतिदिक्।

प्रश्नः ६—ननु मङ्गलं न विघ्नवंसं प्रति न वा समाप्तिम्प्रति कारणमिति ग्रन्थोत्थाने किं वीजम्। किमेतावता ग्रन्थेन साध्यते ? अत्र समाप्तिपदोपादा-नस्य च क आशय ?

उत्तरम्—प्राचीनतार्किकैः समाप्तिरूपफलकत्वस्य नव्यतार्किकैर्विघ्नध्वंस-रूपफलकत्वस्य च मङ्गले स्वीकारेण यावत्फलविशेषशून्यत्वरूपहेतोः पक्षे मङ्गलेऽसत्त्वेन पक्षतावच्छेदकावच्छेदेन हेतोरसिद्धिः स्वरूपासिद्धिरितिलक्षण-

Sri Vidyabharathi Book Centre, Sringeri

'लक्षितस्वरूपासिद्धिरूपदोषवारणमेव "ननु मङ्गलं न विघ्नध्वंसम्प्रति न वा समाप्ति प्रति कारणमि'ति ग्रन्थोत्थाने बीजम् ।

एतावता ग्रन्थेन 'मङ्गलं निष्फलं यावत् फलविशेषशून्यत्वात्' इत्यनुमिति-घटकहेतोः स्वरूपासिद्धित्वं निवार्यते । तथाहि—तत्सत्त्वे तत्सत्वमित्यन्वयः, तदभावे तदभावो व्यतिरेकः इत्युभावप्यन्वय-व्यतिरेकौ सर्वत्र कारणतानियामकौ । एवमेव तत्सत्त्वे तदभावः इत्यन्वयव्यभिचारः, तदभावे तत्सत्त्वमिति व्यतिरेकव्यभिचारः । इत्युभाभ्याम्—अन्वय-व्यतिरेकव्यभिचाराभ्यां तदभावो निश्चीयते । कादम्बर्यादौ सत्यपि मङ्गले निर्विघ्नपरिसमाप्तेरदर्शनेन मङ्गलस्य निर्विघ्नपरिसमाप्त्यासहोऽन्वयव्यभिचारोऽस्ति । तथा च नास्तिकादीनां ग्रन्थेषु मङ्गलं विनाऽपि निर्विघ्नपरिसमाप्तेर्दर्शनेन मङ्गलस्य निर्विघ्नपरिसमाप्त्या सह व्यतिरेकव्यभिचारोऽस्ति । एवं च कादम्बर्यादौ सत्यपि मंगले विघ्नध्वंस-समाप्त्योरभावेन, नास्तिकानां ग्रन्थे मङ्गलाभावेऽपि निर्विघ्नसमाप्तिदर्शनेन च नव्यानां मते विघ्नध्वंसफलकत्वस्य प्राचां मते समाप्तिफलकत्वस्य मङ्गलेऽभावात् तत्रोक्तहेतोः सत्त्वेन स्वरूपासिद्धिस्तत्र न सम्भवति ।

ननु मङ्गले विघ्नध्वंसाजनकत्वमात्रसाधनेनैव तत्र प्राचीनाभिमतविघ्न-ध्वंसद्वारा समाप्तिफलकत्वस्याप्यसिद्धया समाप्तिपदोपादानं व्यर्थमितिचेत् ? न स्वतःसिद्धविघ्नान्यन्ताभाववत्कृतमंगलस्यादृष्टद्वारा समाप्तिफलकत्वस्य साधनाय समाप्तिपदोपादानादितिदिक् ॥

प्रश्नः ७—दिनकरी रीत्या मङ्गलस्य सफलत्वं साध्यताम् । (१९८६)

उत्तरम्—ननु मंगलं निष्फलम् फलविशेषशून्यत्वाज्जलताडनवदित्यनुमानेन मङ्गलस्य निष्फलत्वान्मङ्गलाचरणमयुक्तम् ? नच फलविशेषशून्यत्वादित्यस्य यत्किञ्चित्फलविशेषशून्यत्वादित्यर्थो यावत्फलविशेषशून्यत्वादित्यर्थो वा ? नाद्यः पुत्रेष्टियागादावपि यत् किञ्चित्स्वर्गादिरूपफलविशेषशून्यत्व-सत्त्वेन निष्फलत्वरूपसाध्यस्य च तत्रासत्त्वेन साध्याभाववद्वृत्तितया हेतोर्व्यभिचारित्वापत्तेः । न द्वितीयः, प्राचीनतार्किकैः समाप्तिफलकत्वस्य, नवीनतार्किकै-र्विघ्नध्वंसफलकत्वस्य मंगले स्वीकारेण सकलफलविशेषशून्यत्वरूपहेतोः पक्षे मंगलेऽसत्वेव पक्षतावच्छेदकावच्छेदेन हेतोरसिद्धिः स्वरूपासिद्धिरितिलक्षण-

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

लक्षितस्वरूपासिद्धित्वापत्तेरिति मंगले उक्त हेतुना निष्फलत्वानुमानसम्भव इति वाच्यम् । व्यतिरेकव्यभिचारज्ञानस्य कारणताग्रहविरोधितयां नास्तिकादीनां ग्रन्थे मङ्गलरूपकारणाभावेऽपि समाप्तिरूपस्य विघ्नध्वंसरूपस्य वा फलस्य दर्शनेन कारणाभावे कार्योत्पादरूपव्यतिरेकव्यभिचारसद्भावेन समाप्ते विघ्न विध्वंसस्य वा मङ्गलफलत्वानुपपत्त्या फलान्तरस्य तार्किकैरप्यनङ्गी कृततया यावत्फलविशेषशून्यत्वरूपहेतोः स्वरूपसिद्धित्वाभावेन मङ्गले निष्फलत्वसिद्धे-रिति चेत् ? न, मङ्गलं सफलं विषयत्वात् कृष्यादिवदध्ययनवद्वेत्यनुमानेन मङ्गले सफलत्वसिद्धया तदाचरणस्यावश्यकत्वात् ।

नच सफलत्वं प्रवृत्त्युपयुक्तबलवदनिष्टाननुबन्धित्वविशिष्टसाधनत्वम् । तच्च श्येनयागे नास्ति तस्य बलवदनिष्टनरकसाधनत्वात् शिष्ट कृति विषयत्वं चास्तीति पुनरपि व्यभिचार इति वाच्यम् । अविगीतशिष्टाचारविषयत्वस्य हेतुत्वविवक्षणेनादोषात् । अविगीतत्वं च बलवदनिष्टाननुबन्धित्वम् । यच्च श्येन यागीयकृतौ नास्तीत्याशयात् । एवञ्च मङ्गलं सफलम् अविगीतशिष्टाचार-विषयत्वादित्यनुमाने न मङ्गलस्य सफलत्वं सिद्धयतीति दिक् ।

प्रश्नः ८—मङ्गलस्य सफलत्वानुमानं कीदृशम् ? प्रकृते तदुपयोगः कः ? तद्धेतुघटकपदानां व्यावृत्तिः का ? कस्तद्धेतुघटकपदार्थः ?

उत्तरम्—मङ्गलं सफलम् अविगीतशिष्टाचारविषयत्वात् दर्शादिवत् इति मङ्गलपक्षकसफलत्वसाध्यकानुमानप्रकारः ।

मङ्गलेऽस्यानुमानस्य सफलत्वसाधनद्वारा मङ्गलाचरणस्य औचित्यसूचने तदुपयोगः ।

हेतु घटकपदानां व्यावृत्तिः—चैत्यवन्दनादौ व्यभिचारवारणाय अविगीत-पदस्य निवेशः । अविगीतत्वम्-बलवदनिष्टानुबन्धित्वम् । शिष्टत्वम्-फलसाधन-तांशे भ्रान्तिरहितत्वम् । आचार :—कृतिः विषयत्वश्रुतेः मुख्ये व्यभिचार-वारणाय विषयत्वं विधेयतारूपं विवक्षितम् ।

सफलत्वपदार्थ :—प्रवृत्त्युपयुक्तबलवदनिष्टाननुबन्धित्वविशिष्टसाधनत्वमेव सफलत्वपदार्थः । तेन श्येनयागस्य बलवदनिष्टजनकत्वेऽपि सफलत्वाभावप्रसंगः । इतिदिक् ।

Siddhanta eGangotri Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नः ९—प्राचीनमते मङ्गलस्य केन प्रकारेण किम्फलकत्वम् ? का विघ्नध्वंसावश्यकता ? समाप्तिमंगलयोः कार्यकारणभावः कीदृशः ? कथञ्चान्वयव्यतिरेकव्यभिचारपरिहारः ?

उत्तरम् – मंगलं सफलम्, अविगीतशिष्टाचारविषयत्वादित्यनुमानेन मङ्गलस्य सफलत्वे सिद्धे फलविशेषजिज्ञासायां दृष्टफलकत्वसम्भवेऽदृष्टफलकल्पनाया अनौचित्येन मंगलं समाप्तिफलकं, समाप्त्यन्याफलकत्वे सति सफलत्वादित्यनुमानेन प्राचीनमते मङ्गलस्य सफलत्वं सिद्धयति ।।

ननु किरणावल्यादौ मङ्गलसत्त्वेऽपि समाप्तिरूपकार्यादर्शनेन कारणसत्त्वे कार्यानुत्पादरूपान्वय-व्यभिचारेण मङ्गले समाप्तिकारणत्वसंशयोऽन्वयव्यभिचारज्ञानस्य कारणतासंशयिकत्वादिति चेन्न, प्रचुरविघ्ननाशम्प्रति प्रचुर मङ्गलस्य कारणतया तत्र प्रचुरमङ्गलरूपकारणाभावेनान्वयव्यभिचाराभावात् ।

ननु पूर्वं ग्रन्थसमाप्तेर्मङ्गलफलत्वमुक्तं तथा च विघ्नध्वसो भवतु मा वा, किन्तु ग्रन्थसमाप्तिः किं न स्यादिति चेत् ? न, विघ्नध्वंसद्वारैव मङ्गले समाप्तिजनकत्वस्वीकारेणादोषात् । द्वारत्वं तज्जन्यत्वे सति तज्जन्यजनकत्वम् । विघ्न-ध्वंसो हि मङ्गलजन्यः मङ्गलजन्यसमाप्तिजनकश्चेति इत्थञ्च प्राचां मते विघ्नध्वंसद्वारैव समाप्तिजनकत्वस्वीकारेण विघ्नध्वंसावश्यकता सिद्धा ।

समाप्तिमङ्गलयोः कार्यकरणभावः कीदृशः ?

बलवत्तरविघ्ननाशं प्रति बलवत्तरमङ्गलस्य कारणतास्वीकारेणैव समाप्तिमङ्गलयोः कार्यकारण-भावः स्वीकृतः ।

अन्वयव्यतिरेकव्यभिचार–परिहारः

नास्तिकानां ग्रन्थे मङ्गलाभावेऽपि समाप्तिदर्शनेन जन्मान्तरीयमङ्गलस्य कल्पनेन व्यतिरेकव्यभिचारपरिहारः ।

बलवत्तरस्य विघ्नस्य ध्वंसम्प्रति बलवत्तरस्य मंगलस्य कारणतास्वीकारेण कादम्बर्यादौ समाप्त्यदर्शनेन तादृशमङ्गलाभावस्य तादृशविघ्नस्य कल्पनेन अन्वय-व्यभिचारपरिहार इतिदिक् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नः १०—नव्यानां लते मङ्गलस्य कया युक्त्या किम्फलकत्वम् ? मङ्गल-विघ्नध्वंसयोः कार्यकारणभावः कीदृशः ? मङ्गलं च विघ्नध्वंसविशेषे कारणं विघ्नध्वंसविशेषे च विनायकस्तवपाठादीतिग्रन्थसूचितः निशेषकार्यकारणभावः कीदृशः ? कथञ्चाऽन्वयव्यतिरेकव्यभिचारवारणम् ?

उत्तरम्—यत्र भोगादिना विघ्नध्वंसस्तत्रापि ग्रन्थसमाप्तिः, यत्र च मङ्गलेन विघ्नध्वंसस्तत्रापि ग्रन्थसमाप्तिः, अवश्यवल्लसनियतपूर्ववर्तिना विघ्नध्वंसेनैव मङ्गलस्थलीयसमाप्त्युपपत्तेः नियतावश्यकपूर्वभाविव्यतिरिक्तमन्यथासिद्धम्' इति लक्षणमादितान्यथासिद्धिसत्वेन नव्यानां मते मंगलस्यान्यथासिद्धत्वातविघ्नो मे निवर्तताभिति कामनया मङ्गलाचरणाच्च मङ्गलस्य विघ्नध्वंस एव फलम् । समाप्ति प्रति तु बुद्धिप्रतिभादि-प्रतिबन्धकसंसर्गाभावतयाविघ्नध्वंसादि च कारणम् । नचैवं स्वतः सिद्धिविघ्नात्यन्ताभाववत्कृतमङ्गलस्य निष्फलत्वापत्तिरिति वाच्यम् । तस्या इष्टत्वात् । नचैवं मङ्गले विघ्ननाशकताबोधकवेदस्याप्रामाण्यापत्तिरिति वाच्यम्, सति विघ्ने तत्र तन्नाशकताया एव वेदबोधितत्वात् । अत एव पापभ्रमेण कृतस्य प्रायश्चित्तस्य निष्फलत्वेऽपि न तद्बोधक वेदाप्रामाण्यम् ।

मंगलविघ्नध्वंसयोः विशेषकार्यकारणभाव :—

मङ्गलविघ्नध्वंसयोस्तु विशिष्यैव कार्यकारणभावः, तथा च स्वरूपसम्बन्धेन विघ्नध्वंसम्प्रति स्वजन्यापूर्ववत्त्वसम्बन्धेन मङ्गलंकारणम् । मङ्गलाव्यवहितोत्तरक्षणजायमानविघ्नध्वं सत्वावच्छिन्नं प्रति मङ्गलकारणम् एवं च विनायकस्तवपाठाव्यवहितोत्तरक्षणजायमानः विघ्नध्वंसत्वावच्छिन्नं प्रति विनायकस्तवपाठः कारणम्—इत्यादिप्रकारेण विशेषकार्यकारणभावः 'मङ्गलं च विघ्नध्वंसविशेषे कारणमि' त्यादिग्रन्थेन सूचितः ।

अन्वयव्यतिरेकव्यभिचारवारणम्

नास्तिकानां ग्रन्थे मंगलं विनैव समाप्तिदर्शनात् कुतश्चित् विघ्नध्वंसस्य स्वतः सिद्धविघ्नात्यन्ताभावस्य वा कल्पनया व्यतिरेकव्यभिचारस्य वारणं भवति । एवं कार्यविशेषे मङ्गलेन [illegible] मंगलापेक्षयाऽधिकस्य महतो वा विघ्नस्य कल्पनयाऽन्वयभिचारवारणं भवतीति दिक् ।।

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नः ११—क्वचिच्च विघ्नात्यन्ताभाव एव समाप्तिसाधनमित्यादि-ग्रन्थोत्थाने किं बीजम् ? प्रतिबन्धकसंसर्गाभावस्यैव च कार्यजनकत्वकथनैकोऽभिप्रायः ?

उत्तरम्—स्वतःसिद्धविघ्नात्यन्ताभावस्थले विघ्नध्वंसाभावेऽपि समाप्तिदर्शनेन व्यतिरेकव्यभिचारेण तस्य समाप्तिसाधनत्वं न स्यादिति-चेन्न, क्वचिच्च विघ्नध्वंसेन क्वचिच्च विघ्नात्यन्ताभावेन समाप्तिर्भवतीति स्वीकारात् । नच एवमननुगमः विघ्नप्रतियोगिकसंसर्गाभावत्वेन कारणता-स्वीकारात् ।

प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वकथनेऽभिप्रायः

प्रतिबन्धकसंसर्गाऽभावस्य कार्यमात्रं प्रतिसामान्यतः कारणत्वसिद्धेः न पृथक् सामान्यतः कार्यकारणभावकल्पनाऽस्माकंविघ्नसंसर्गाभावस्य समाप्तिं प्रति कारणतावादिनां भवतीत्येव प्रतिबन्धकसंसर्गाभावस्यैव च कार्यजनकत्व-कथनेऽभिप्रायः । इतिदिक्

प्रश्नः १२—न्यायसिद्धान्तमुक्तावल्या अनुबन्धचतुष्टयं प्रतिपाद्य संसार-महीरुहस्य बीजाय' इत्यंशं व्याख्याय ईश्वरास्तित्वं संसाधनीयम् । (१९८६)

उत्तरम्—मंगलाचरणप्रसंगे महामहोपाध्यायविश्वननाथपंचानन-भट्टाचार्येण—

(१) सद्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका—'इत्यादिपद्येन द्रव्यादिपदार्थप्रतिपादकत्वप्रदर्शनेन द्रव्यादयो ग्रन्थस्य विषया उक्ताः ।

(२) पदार्थतत्त्वावधारणं ग्रन्थस्य प्रयोजनं सूचितम् ।

(३) प्रतिपाद्यप्रतिपादकभावः सम्बन्धः सूचितः ।

(४) पदार्थतत्त्वावधारणकामोऽधिकारीति ग्रन्थादावेव श्रोतृप्रवृत्तये विषय-प्रयोजन-सम्बन्धाऽधिकारिरूपमनुबन्धचतुष्टयं न्यायसिद्धांन्तमुक्तावलीकारेण प्रतिपादितम् ।

"संसारमहीरुहस्य बीजाय"

व्याख्या—संसार एव महीरुहो वृक्षस्तस्य संसारमहीरुहस्य बीजाय-निमित्तकारणाय (श्रीकण्ठाय नमः) इति । पद्यांशोऽयं 'नूतनजलधरेत्यादि-मङ्गलश्लोकस्यान्तिमांशः ।

Sri Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सकलप्रपंचहेतोरीश्वरस्य महीरुहबीजत्वमात्रकथनस्यानुचितत्वे 'संसारस्य महीरुहः' इति षष्ठीतत्पुरुषस्य भ्रान्तिं व्यावर्त्तयितुं 'संसार एव महीरुहः इति कर्मधारायमाह मुक्तावलीकारः । बीजत्वं समवायिकारणत्वं तच्च ईश्वरे बाधितमत आह—निमित्तकारणायेति ।

ननु बीजनाशानन्तरं बीजावयवैरङ्कुरोत्पादात् बीजावयवा एव वृक्षस्य समवायिकारणम् । तेन 'बीजाय' इत्युक्त्या ईश्वरायवा जगतः कारणमिति प्रतीयते । तच्च न युक्तम् ईश्वरस्य निरवयवत्वात् । अतो 'बीजाय' इत्यस्यार्थमाह 'निमित्तकारणायेति ।

ईश्वरास्तित्वम्

नन्वीश्वरे प्रमाणाभावात्तन्नमकस्करणयुक्तम् । तथाहि—प्रत्यक्षं द्विविधं बाह्यं मानसं च । तत्र बहिरिन्द्रियजन्यद्रव्यप्रत्यक्ष उदभूतरूपस्य कारणत्वात् ईश्वरे रूपाभावान्न बाह्यप्रत्यक्षप्रसरः नवा मानसप्रत्यक्षप्रसरः परमात्मनः-परेण मनसा प्रत्यक्षवारणाय आत्ममानसंप्रति परात्मव्यावृत्तविजातीयमनः संयोगत्वेन कारणताऽभ्युपगमात् । नाप्यनुमानं प्रमाणम्, ईश्वरस्याप्रत्यक्षतया तस्य केनचिल्लिंगेन सहचारदर्शनाभावेन व्याप्तिग्रहाभावात् । नवोपमानं प्रमाणम्, ईश्वरतुल्यस्य कस्य चिदभावेन सादृश्यज्ञानासत्त्वात् । नापि शब्दः प्रमाणम्, श्रुतीनामीश्वरोच्चरितत्वेनैव प्रामाण्यस्य वक्तव्यतया तत्रेश्वर एव सन्देहेन श्रुतिप्रामाण्यस्यापि सन्दिग्धत्वादिति चतुर्विधप्रमाणागोचर ईश्वरः कथं नमस्कार्यताभागिति चेद् ? न, कार्यं प्रति कृतेः कारणतास्वीकारेण 'क्षितिः कृतिजन्या कार्यत्वाद् घटवत इत्यनुमानेन क्षितेः कृतिजन्यत्वसिद्धौ क्षितिजनिका कृतिः यत्किंचिदात्मसमवेता कृतित्वादस्मदादिकृतिवदित्यनुमानेन तादृशकृत्याश्रयीभूतः कश्चिदात्मा सिद्धयति । स चास्मदादिर्न सम्भवतीति ईश्वरास्तित्वं सिद्धमेवेतिदिक् ।

प्रश्नः १३—ईश्वरसत्तायां दिनकरीकारेण किं मानमुपस्थापितमिति सम्यगालोच्यताम् । (१९८६)

उत्तरम्—ननु प्रमीयविषयता सबन्धेनेश्वरज्ञानाभावात् तस्य नमस्कार-रूपं मङ्गलाचरणमयुक्तम् । तथाहि—न तत्र प्रत्यक्षं प्रमाणम् अरूपिद्रव्यत्वेन

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वाह्यप्रत्यक्षविषयत्वात् । नापि मानसं प्रमाणम् परात्मनः परेण मनसा प्रत्यक्ष-वारणाय आत्मप्रत्यक्षं प्रति प रात्मव्यावृत्तविजातीयमनःसंयोगित्वेन हेतुत्व-स्यावश्यकताया ईश्वरे तस्यामावात् । नाप्यनुमानं प्रमाणं लिंगाभावात् । "न च" द्यावाभूमीजनयन्" इत्यादिश्रुतिरेव प्रमाणमिति वाच्यम् । श्रुतीनामीश्व-रोच्चरितत्वेन प्रमाण्यादीश्वरसन्देहे श्रुतिप्रामाण्यस्यापि सन्दिग्धत्वादिति चेन्न, कार्यं प्रति कर्तुः कारणतास्वीकारेण 'क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वाद् घटवदित्यनुमानेन क्षित्यंकुरादीनां कर्तृजन्यत्वात् । नच तत्कर्तृत्वस्मदादीनां सम्भवतीति तत् कर्तृत्वेन ईश्वरसत्तायां दिनकरीकारेण अनुमानरूपं प्रमाणमुप-स्थापितमितिदिक् ।

प्रश्नः १४--यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यंकुरादिकमपि इति विश्वनाथः अत्र पृच्छ्यते--श्रुतिप्रमाणसत्वे अनुमानप्रमाणस्य किं प्रयोजनम् । कीदृशानुमानेन कथमीश्वरः सिद्धयति ? किमत्र पक्षतावच्छेदकम् ?

ततः "द्यावाभूमी जनयन्···'इत्यादिश्रुतिप्रमाणसत्वे अनुमानप्रमाणस्य किं प्रयोजनम्—इति चेत् ? न श्रुतीनामीश्वरोच्चरितत्वेन प्रामाण्यात् ईश्वर-सन्देहे श्रुतिप्रमाणस्यापि सदिग्धत्वात् श्रुत्यपेक्षया अनुमानप्रमाणस्वीकर्तृणां संख्याधिक्याच्च । तथाहि—

क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत्—इत्यनुमानेन क्षित्यङ्कुरादिके कर्तृजन्यत्वे सिद्धेतत्कर्तृत्वस्य तदुपादानगोचरापरोक्षज्ञानचिकीर्षा कृति-मत्वरूपस्य अस्मदादिष्वसंभवात् तत्कर्तृत्वेन ईश्वरः सिद्धयति ।

अत एव ईश्वरसत्तायां श्रुतिप्रमाणसत्वेऽपि अनुमानप्रमाण-स्वीकर्तृणां संख्याधिक्येन अनुमानस्य प्रयोजनम् ।

अत्र पक्षतावच्छेदकम्

अत्र पक्षतावच्छेदकम्—क्षितित्वम् । इति दिक् ।

प्रश्नः १५--शक्तेः पदार्थान्तरत्वं निरस्यताम् ? (१९८६)

अथवा

शक्तेः सप्तपदार्थातिरिक्तपदार्थत्वं कया युक्त्या कस्य मतम् ? कथञ्च तन्निराकरणम् क्व च न्यायनये तस्या अन्तर्भावः ?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

उत्तरम्—ननु कथमेते सप्तैव पदार्था शक्तेरतिरिक्तपदार्थत्वात्। तथाहि वह्निसत्वेऽपि प्रतिबन्धकचन्द्रकान्तमण्यादिसमवधाने सति वह्निना दाहो न जन्यते। प्रतिबन्धकमण्यादीनामपसारणे सूर्यकान्तमणिसमवधाने वा दाहो जन्यते अतो दाहं प्रति तदनुकूलशक्तिमद्वह्नित्वेन वह्नेः कारणता कल्प्यते। तथा च वह्निसत्वेऽपि प्रतिबन्धकमणिसमवधानेशक्तिर्नश्यतीति शक्तिमद्वह्नित्वाभावादेवदाहो नोपपद्यते प्रतिबन्धकापसरणे उत्तेजकसमवधाने वा शक्तिरुत्पद्यते। सा च शक्ति र्न जातिमदात्मिका गुणवृत्तित्वात् नापि जातिरहिता उत्पत्तिमत्वे सति विनाशित्वात्। इतिशक्तेः सप्तपदार्थातिरिक्तपदार्थत्वात् न सप्तैव पदार्था इति मीमांसकानां मतं न समीचीनम्। कार्यम्प्रति प्रतिबन्धकाभावस्य कारणताऽङ्गीकारेण दाहं प्रति उत्तेजकाभावविशिष्टमण्यभावोऽपि कारणमिति कल्प्यते। एवं च वह्निसत्वेऽपि उत्तेजकाभावविशिष्ट-मणिसमवधाने प्रतिबन्धकाभावरूपकारणाभावादेव दाहाभावस्य चन्द्रकान्तमण्यसमवधाने उत्तेजकसूर्यकान्तमणि समवधाने वा कारणसत्वात् दाहस्य चोपपत्तौ अनन्तशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात् शक्तिकल्पने मानाभावात्।

न चैवमपि वह्नौ दाहानुकूलाशक्तिरित्यादिप्रतीतिसिद्धशक्तिपदार्थोऽतिरिक्तोऽवश्यमभ्युपेय इति वाच्यम्। न्यायनये तादृशप्रतीतिविषयशक्तेः वह्निनिष्ठदाहकारणत्वादावन्तर्भावादिति दिक्।

प्रश्नः १६—सादृश्यस्य पदार्थान्तरत्व-निरस्यताम्। (१९८६)

अथवा

सादृश्यं सप्तपादार्थातिरिक्तपदार्थ इति कया युक्त्या कस्य मतम् ? कथं च तत्खण्डनम् ?

उत्तरम्—ननु देवदत्तसदृशो यज्ञदत्त इति प्रतीत्या सादृश्यमपि पदार्थः सिद्ध्यति। तच्च सादृश्य षड्भावानन्तर्भूतं सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वात्। यथा गोत्वं नित्यं तथाऽश्वत्वमपि इति प्रतीत्या सादृश्यसामान्यवृत्तित्वं बोध्यम्। तथा च प्रमेयत्वे व्यभिचारवारणाय व्यतिरेकित्वे सतीति देयम्। सादृश्यमभावानन्तर्भूतं सत्वेन प्रमेयत्वादित्यनुमानाभ्यां सादृश्यस्य सप्तपदार्थानन्तर्गततया सप्तैव पदार्था इति कथनं मीमांसकमतेना-

CC-O. Jangamwadi Math Collection. Digitized by eGangotri
Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

संगतमेवेति चेत् ? न, तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वस्यैव सादृश्यरूपतया घटसदृशः पटः इत्यादौ जातौ यथा गोत्वं नित्यं तथाऽश्वत्वमपि इत्यादौ चन्द्र-सदृशं मुखमित्यादौ च नित्यत्वाह्लदकत्वादिरूपोपाधौ सादृश्यस्थान्तर्भावेन-सर्वत्र वस्तुपदार्थेष्वेव तस्यान्तर्भावादिति दिक् ॥

प्रश्नः १७—ननु द्रव्यत्वजातौ किं मानमितिशंकोत्थाने किं बीजम् ? द्रव्यत्वजातिसिद्धिप्रकारः कः ? संयोगस्य विभागस्य वेत्यपरपक्षद्वयोल्लेखं प्रयोजनञ्च किम् ?

उत्तरम्—मूले द्रव्याणीत्युक्तं तत्र द्रव्याणीत्यस्य यदि गुणवन्तीत्यर्थस्तदा गुणानां शक्यतावच्छेदकत्वे गौरवम्, उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठ्रमतीतिनियमेनोत्पन्नघटें द्रव्यशब्दप्रयोगानुपपत्तिश्चातो द्रव्याणीत्यस्य द्रव्यत्वजाति-विशिष्टानीत्यर्थो वाच्यः । तदा द्रव्यत्वस्य शक्यतावच्छेदकतया न गौरवम्, नवोत्पन्नघटे द्रव्यशब्दप्रयोगानुपपत्तिर्द्रव्यत्वजातेस्तत्र सत्वात्, एवञ्च द्रव्याणीत्यनेन द्रव्यत्वजातेरुपस्थित्या द्रव्यत्वजातौ किं मानमिति शंकाकरणमुचितमेव ।

द्रव्यत्वजातिसिद्धि प्रकारः

ननु अननुगताकृतिषु धृतजतुप्रभृतिषु पण्डितानामिदं द्रव्यमिति प्रतीति-सद्भावेऽपि पामराणामिदं द्रव्यमिति प्रतीत्यत्रानेनाऽऽपामरप्रसिद्धानुगत प्रतीतेरेव जातिसाधकतया प्रकृते तस्या अभावेन प्रत्यक्षप्रमाणेन द्रव्यत्व-जातिसिद्धेरयोगोगादिति चेन्न, गुणे गुणोत्पत्तिवारणाय समवायेन कार्यं प्रति तादात्म्येन द्रव्यं कारणमिति कार्यकारणभावस्यावश्यकतया समवायसम्बन्धा-वच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नद्रव्यनिष्ठकारण-ता लभ्यते । ततश्च यत्र-तत्र कारणतात्वं तत्र-तत्र किञ्चिद्धर्मावच्छिन्नत्वमिति दण्डादिनिष्ठकारणतादौ सहचारदर्शनेन कारणतात्वं किञ्चिद्धर्मावच्छिन्नत्व-व्याप्यमिति व्याप्तिज्ञानं जायते । ततः कारणतात्ववत्येषा द्रव्यनिष्ठा कारणतेति पक्षधर्मताज्ञानम्, ततो व्याप्तिस्मरणम्, ततः किञ्चिद्धर्मावच्छिन्नत्वव्याप्यकारणा-तात्ववत्येषा कारणतेति परमर्शज्ञानम् । ततः समवायसम्बन्धावच्छिन्नकार्यत्वा-वच्छिन्नकार्यतानिरूपितादात्म्यसम्बन्धावच्छिन्नद्रव्यनिष्ठकारणता किञ्चि-

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

द्धर्मावच्छिन्नाकारणतात्वाद् दण्डत्वावच्छिन्नदण्डनिष्ठकारणतावदित्यनुमानेन किञ्चिद्धर्मावच्छिन्नत्वसिद्धौ यद्धर्मावच्छिन्ना द्रव्यनिष्ठाकारणता तदेव द्रव्यत्वमिति द्रव्यत्वजातिसिद्धिप्रकारः ।

संयोगस्य विभागस्य वेत्यपरपक्षद्वयोल्लेख-प्रयोजनम्

नच प्रागभावप्रतियोगित्वरूपकार्यत्वस्य ध्वंससाधारण्ये नातिप्रसक्तयो समवायसम्बन्धावच्छिन्नकार्यतावच्छेदकत्वासम्भवात् द्रव्यत्वरूपधर्मसाधकानुमानासम्भव इति वाच्यम्, समवायेन संयोगं प्रतितादात्म्येन द्रव्यं कारणम् इति कार्यकारणभावस्वीकारेण कार्यत्वावच्छिन्नपदस्थाने संयोगत्वावच्छिन्नपदप्रक्षेपेण तदनुमानोपपत्तेः ।

ननु एवमपि विभुद्वयसंयोगस्वीकर्तृमते संयोगत्वस्य नित्यानित्यवृत्तितया कार्यतावच्छेदकत्वासम्भवमेवेति चेन्न, समवायेन विभागं प्रति तादात्म्येन द्रव्यं कारणमिति' स्वीकारेण संयोगत्वावच्छिन्नपदस्थाने विभागत्वावच्छिन्नपदम्प्रयोगेण तदनुमानोपपत्तेरिति संयोगस्य विभागस्य वेत्यपरपक्षद्वयोल्लेख-प्रयोजनम् । इतिदिक् ।

प्रश्नः १८—तमसो दशमद्रव्यत्वमुपपाद्य निरस्यताम्—

उत्तरम्—ननु 'नीलं तमश्चलति' इति प्रतीत्या चाक्षुषप्रत्यक्ष-सिद्धतमसः तमो द्रव्यं रूपवत्त्वात्–कर्मवत्वाच्चेत्यनुमानेन द्रव्यत्वसिद्धौ तमः पृथिवीत्वाभाववत् गन्धशून्यत्वात्, तमो न जलाद्यन्यतमरूपं नीलरूपवत्वादित्यनुमानाभ्यां कल्पनवद्रव्येष्वनन्तर्भावात् दशमं द्रव्यं तमः कुतोनोक्तमिति चेत् ? न, तमस्तेजोऽभावरूपताऽङ्गीकारेणैवोपपत्तौ द्रव्यान्तरकल्पनाया अनुचितत्वात् । रूपवताप्रतीतिस्तु भ्रमरूपा, कर्मवत्त्व–प्रतीतिरप्यालोकापसरणौपाधिकी भ्रान्तिरेवेति न रूपवत्त्वकर्मवत्त्वहेतुभ्यां द्रव्यत्वं साधयितुमलम् ।

ननु प्रतीतेर्भ्रान्तित्वं तत्रैव स्वीक्रियते यत्रोत्तरकाले बाधः प्रकृते च न तथेति कथं भ्रान्तित्वमिति चेत् ? न, तमसोऽतिरिक्तद्रव्यत्वाङ्गीकारेऽनन्ताश्रयवादिकल्पने गौरवापत्त्या लाघवार्थं प्रतीतेर्भ्रमत्वस्यैवौचित्यात् ।

Sri Vidyabharathi Book Centre, Singeri

CC-O. In Public Domain. Digitized by eGangotri

नच तम एव द्रव्यं तेज एव तमोऽभाव इति वाच्यम्। उष्णस्पर्शवत्व-प्रतीत्यन्यथाऽनुपपत्या तेजसोऽभावरूपताया अंगीकर्तुमशक्यत्वात्। इदमेव सूचयितुमावश्यकतेजोऽभावेनेत्यावश्यकत्वं तेजोविशेषणमुपात्तमितिदिक्।

प्रश्नः १९—जातेः सपदकृत्यं लक्षणं किम्? परस्या अपरस्याश्च जातेः लक्षणोदाहरणानि कानि? द्रव्यगुणकर्मभिन्नावृत्ति-धर्मत्वस्यैव च कुतो न जातिलक्षणता?

उत्तरम्—नित्यत्वे सति अनेकनिरूपितसम्बन्धावच्छिन्नवृत्तितावत्त्वं जाते-र्लक्षणम्। पटादावतिव्याप्तिवारणाय 'नित्यत्वे सति' इत्युक्तम्। गगनपरि-माणादावतिव्याप्तिवारणाय 'अनेकनिरूपिते' त्युक्तम्। अत्यन्ताभावेऽतिव्या-प्तिवारणाय 'समवाय-सम्बन्धावच्छिन्ने' त्युक्तम्। विभुद्वयसंयोगस्वीकर्तृ-मते नित्यसंयोगेऽतिव्याप्तिवारणाय 'संयोगभिन्नत्वे सति' इत्यपि लक्षणे देयम्। इति सपदकृत्यं जातेर्लक्षणम्।

सा च जातिः परापरभेदात् द्विधा। तत्र परत्वमधिकदेशवृत्तित्वम्। अपरत्वमल्पदेशवृत्तित्वम्। यथा—परं सत्ता अपरं घटत्वादिः। द्रव्यत्वादि. तु निरूक्तलक्षणद्वयसत्वात् परमपरंच।

न नु द्रव्यगुणकर्मभिन्नावृत्तिधर्मत्वस्यैव च जातिलक्षणता कुतो नेति चेत्? न, तस्य द्रव्यगुणान्तरत्वादावतिव्याप्तेरितिदिक्।

प्रश्नः २०—व्यक्तेरभेदस्तुल्यत्वं संकरोत्थानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः॥

एतदुक्तजातिबाधकानि परिष्कृत्य तदुदारणानि निरूप्यन्ताम्। अथवा—जातिबाधकाः के? सोदाहरणं विशदीक्रियताम्।

उत्तरम्—व्यक्तेरभेद इति—अत्र व्यक्तेरित्यत्रनिष्ठत्वं-षष्ठ्यर्थः। तथा च स्वाश्रयीभूतव्यक्तिनिष्ठो भेदभावः स्वस्य जातित्वे बाधकः। स्वम् आकाशत्वं तदाश्रयीभूता व्यक्तिराकाशरूपा तत्राकाशभेदः 'आकाशं न' इति प्रतीति साक्षिको वर्तते इति भेदाभावसत्त्वादाकाशत्वं न जातिः।

तुल्यत्वमिति—तुल्यव्यक्तिवृत्तित्वं घटत्व-कलशत्वादिजातीनां भेदे बाध-कम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

संकर इति—परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः सङ्करः जातित्वे बाधकः। यथा मूर्तत्वाभाव आकाशे तत्र च भूतत्वम्, भूतत्वाभावो मनसि तत्र च मूर्तत्वम् उभयोः पृथिव्यादिचतुष्टये समावेश इति साङ्कर्याद् भूतत्वं मूर्त्तत्वं वा न जातिः।

अनवस्थितिरिति–अप्रमाणिकानन्तपदार्थकल्पनाया अविश्रान्तिरनवस्थितिः जातिवृत्तेर्जातित्वे बाधिका। तथाहि—यदि घटत्वादिवृत्तिजातित्वं जातिः, तथा घटत्वादि तद्वृत्तिजातित्वोभयवृत्तिजातित्वमपि जातिः, एवं तस्य जातित्वे घटत्वादि तद्वृत्तिजातित्वतादृशोभयवृत्तिजातित्वैतत् त्रितयवृत्तिजातित्वमपि जातिरित्यादिरीत्याऽनवस्थायां सत्यां घटत्वादिवृत्तिजातित्वं न जातिः।

रूपहानिरिति—रूपस्य स्वतोव्यावर्तकत्वस्य हानिः रूपहानिः विशेषत्वस्य जातित्वं बाधते। तथाहि—परमाणुनिष्ठपरमाण्वन्तरभेदसाधकत्वं विशेषस्य तद्व्यक्तित्वेनैव रूपेण हेतुता वाच्या, जातिमन्निष्ठव्यावर्तकताया जात्यवच्छिन्नत्वनियमात् तथा च व्यभिचार इति विशेषत्वं न जातिः।

असम्बन्ध इति—समवेतवृत्त्यनुयोगितासम्बन्धावच्छिन्नप्रतियोगिताकसमवायाभावोऽसम्बन्धः समवायत्वाभावत्वयोर्जातित्वबाधकः। तथाहि—समवायत्वाभावत्वयोरसमवेतत्वात् तादृशसम्बन्धावच्छिन्नप्रतियोगिताकसमवायाभावस्य सत्वात् समवायत्वमभावत्वं च न जातिरितिदिक्।

प्रश्नः २१—विशेषपदार्थसिद्धौ का युक्तिः? इति समाधाय सामान्यस्य लक्षणं पदकृत्यमुखेन प्रतिपादनीयम्। (१९८६)

उत्तरम्—अन्त्यत्वे सति नित्यद्रव्यवृत्तित्वं विशेषत्वमिति विशेषस्य लक्षणम्।

ननु विशेषपदार्थसिद्धौ का युक्तिरिति—अयं घट अस्माद्घटाद्भिन्नो भिन्नावयवारब्धत्वात्, अयं घटावयवः अस्माद् घटावयवाद् भिन्नो भिन्नावयवारब्धत्वादित्येवं द्व्यणुकपर्यन्तं भिन्नावयवारब्धत्वरूपहेतुना परस्परं भेदसाधनसम्भवेऽपि परमाणूनां निरवयवत्वेन तेषां परस्परं भेदसाधनाय विशेषोऽभ्युपगम्यते। तथा च अयं परमाणुः अस्मात्परमाणो भिन्नो विशेषादित्यनुमानेन परमाणूनां परस्परं भेदः सिध्यति। अन्यथा परमाणूनां परस्परं भेदासिद्धौ

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

द्व्यणुकादीनामपि तदसिद्धया घटादीनामपि भेदासिद्धिप्रसङ्गः स्यात् । अत एवोक्तं ग्रन्थकारेण मुक्तावल्यां घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात्परस्परं भेदः, परमाणूनां परस्परभेदको विशेष एव, स तु स्वत एव व्यावृत्तः, तेन तत्र विशेषान्तरापेक्षा नास्तीति ।

पदकृत्यमुखेन सामान्यस्य लक्षणम्

नित्यत्वे सत्यनेकसमवेतत्वं सामान्यस्य लक्षणम् । अनेकसमवेतत्वं संयोगादीनामप्यस्ति; अत उक्तं नित्यत्वे सतीति, नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तमनेकेति ।

नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावस्याप्यस्ति अतो वृत्तित्वसामान्यं विहाय समवेतेत्युक्तम् । इति दिक् ।

प्रश्नः २२—विशेषपदार्थस्य निर्दुष्टं लक्षणं किम् ? तदङ्गीकारे का युक्तः ? तत्र कीदृशं व्यावृत्तत्वम् नवीनमते च तस्यावश्यकता न वा ?

उत्तरम्—अन्त्यो नित्यद्रव्यवृत्तिविशेष इत्यनेन "स्वतो व्यावृत्तित्वे सति नित्यद्रव्यवृत्तित्वं विशेषपदार्थस्य लक्षणम् । ननु विशेषपदार्थाङ्गीकारेका युक्तिरिति चेन्न, अयं घटः अस्माद्घटाद् भिन्नो भिन्नावयवारब्धत्वादित्यादिक्रमेण भिन्नावयवारब्धत्वहेतुना घटादीनां द्व्यणुकपर्यन्तानां परस्परं भेदसाधनेऽपि निरवयवपरमाणूनां तत्साधनाय विशेषपदार्थाभ्युपगमात् । तथा च अयं परमाणुस्तस्मात्परमाणोर्भिन्नस्तद्विशेषादित्यनुमानेन तेषां परस्परं भेदः सिद्धयति, अन्यथा परमाणूनां तदसिद्धौ द्व्यणुकादीनामपि परस्परं भेदासिद्धया घटादीनामपि तदसिद्धिप्रसङ्गः ।

स च विशेषः स्वत एव व्यावृत्तः, तथा च अयं विशेषस्तस्माद्विशेषाद् भिन्नः स्वस्मादित्याद्यनुमानेन विशेषाणामपि परस्परं भेदसिद्धौ तदर्थविशेषान्तरापेक्षा नास्तीति नानवस्था । तत्र स्वतो व्यावृत्तत्वं च स्वप्रयोज्यस्वनिष्ठस्वजातीयप्रतियोगिकभेदकत्वम् ।

नवीनास्तु नित्यद्रव्याणामेव स्वतो व्यावृत्तत्वमभ्युपगम्येष्टसिद्धया विशेषपदार्थस्यावश्यकता नास्तीति नवीनमतम् । इति दिक् ।

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Sadhana Kendra Trust Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नः २३—असम्बन्धः जातिबाधक इति दिनकरीरीत्या व्याख्यायताम् । (१९८६)

उत्तरम् — असम्बन्धः = समवेतवृत्त्यनुयोगितासम्बन्धावच्छिन्नप्रतियोगिताकसमवायाभावोऽसम्बन्धः समवायत्वाभावत्वयोर्जातित्वबाधकः । तथाहि— समवेतत्वाभावत्वयोरसमवेतत्वात् तादृशसम्बन्धावच्छिन्नप्रतियोगिताकसमवायाभावस्य सत्त्वात् समवायत्वमभावत्वञ्च न जातिरिति ।

ननु दिनकर्यमानवस्थाऽसम्बन्धरूपहानीनां जातिमत्त्वे बाधकत्वं यदुक्तं तन्न समीचीनम्, सकृदुच्चरितन्यायेन जातिबाधकपदस्य जातित्व-जातिमत्त्वोभयबाधकपरत्वासम्भवात् ।

जातिबाधकसंग्रह इत्यत्र भावप्रधाननिर्देशतया जातिपदस्य जातित्वपरत्वमिति बोध्यम् । इति दिक् ।

प्रश्नः २४—समवायस्य सपदकृत्यं लक्षणं किम् ? समवायसिद्धिप्रकारः कः ?

अथवा

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।
तेषु जातेश्च सम्बन्धः समवायः परिकीर्त्तितः ॥

इति कारिकां विशदं व्याख्येया ।

उत्तरम्— षष्ठ्यर्थः प्रतियोगित्वं सप्तम्यर्थोऽनुयोगित्वं तथा च घटप्रतियोगिकः कपालानुयोगिकः यः सम्बन्धः स समवायः । एवं च समवायत्वं नित्यसम्बन्धत्वम् — नित्यत्वे सति सम्बन्धत्वं समवायत्वम् इति समवायस्य लक्षणम् । संयोगेऽतिव्याप्तिवारणाय 'नित्यत्वे सति' इत्युक्तम् । परमाण्वादावतिव्याप्तिवारणाय सम्बन्धत्वमित्युक्तम् ।

ननु द्रव्यत्वाभावादीनां सम्बन्धः न प्रतियोग्यनुयोग्युभयरूपो गौरवात् किन्तु लाघवेन द्रव्यत्वाभावस्वरूप एव स च नित्य इति द्रव्यत्वाभावरूपसम्बन्धेऽतिव्याप्तिरिति चेन्न, सम्बन्धप्रतियोग्यनुयोगिभिन्नत्वे सतीत्यस्यापि निवेशेनादोषात् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

न च नित्यसंयोगाङ्गीकर्तृमते नित्यसंयोगेऽतिव्याप्तिरिति वाच्यम् । नित्यत्वे सतीत्यनेन नित्यमात्रवृत्तिधर्माश्रयत्वे सतीत्यस्य विवक्षणेनादोषात् ।

समवायसिद्धिप्रकारः

ननु विशेषणतासन्निकर्षेण समवायस्य प्रत्यक्षतया तत्र नानुमानापेक्षेति गुणक्रियादीत्यादिनाऽनुमानोपन्यासो व्यर्थ इति चेन्न, कालघटसंयोगप्रत्यक्षवारणाय संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य कारणतेतिवादिनो नैयायिकस्य मते समवायस्य प्रत्यक्षत्वेऽपि सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य कारणतेतिवादिनो वैशेषिकस्य मते समवायस्यैकतया एकदा तदाश्रयीभूतसकलव्यक्तीनां प्रत्यक्षासम्बन्धेन समवायस्याप्यप्रत्यक्षतया तन्मतानुरोधेनानुमानोपन्यासस्सार्थक्यादिति दिक् ।

प्रश्नः २५--समवायसाधनप्रकारमुपपाद्य तस्य विलक्षणसम्बन्धत्वे किं मानम् ? किञ्च तस्य निर्दुष्टं सपदकृत्यं लक्षणम् ? एवं समवायस्यैकतया वाय्वादौ रूपादिप्रमाऽऽपत्तिः कुतो न ? तथा अभावस्य वैशिष्ट्यं सम्बन्धान्तरं कुतो न ? इति समुपपाद्यताम् ।

उत्तरम्-'संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य कारणते'तिवादिनो नैयायिकस्य मते समवायस्य प्रत्यक्षत्वेऽपि सम्बन्धप्रत्यक्षं यावदाश्रयप्रत्यक्षस्य कारणते'तिवादिनो वैशेषिकस्य मते समवायस्यैकतया एकदा तदाश्रयीभूतानन्तव्यक्तीनां प्रत्यक्षासम्भवेन समवायस्याप्रत्यक्षतया रूपीघटः इत्यादि विशिष्टबुद्धिविशेषण-विशेष्य-सम्बन्धविषयाविशिष्टबुद्धित्वाद् दण्डीपुरुष इति विशिष्टबुद्धिवदित्यनुमानेनायुतसिद्धद्रव्ययोरेव संयोग इति नियमेन संयोगबाधात् साध्यघटकतया लाघवादेकः समवायः सिद्ध्यति । न च स्वरूपसम्बन्धमादाय तदनुमानोपपत्तौ कथं समवायात्मकविलक्षणसम्बन्धकल्पनमिति वाच्यम्, कल्पानन्तस्वरूपाणां तेन सम्बन्धकल्पने गौरवात् ।

समवायस्य निर्दुष्टं सपदकृत्यं लक्षणम्

नित्यत्वे सति सम्बन्धप्रतियोग्यनुयोगिभिन्नत्वे सति सम्बन्धत्वं समवायस्य लक्षणम् । तत्र क्रमेण संयोग, महाकालीद्यात्मकस्वरूपसम्बन्धे, परमाण्वादौ

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri
चातिव्याप्तिवारणाय दलानि। इति समवायस्य निर्दुष्टं सपदकृत्यं लक्षणमिति।

समवायस्यैकतया वाय्वादौ रूपादिप्रमाऽऽपत्तिः कुतो न? ननु समवायस्यैकतया वायौ स्पर्शसमवायस्य सत्त्वेन स्पर्शसमवाय-रूपसमवाययोरैक्येन 'सम्बन्धसत्ता सम्बन्धिसत्तायां नियामिका भवति' इति नियमात् रूपवान् वायुरिति प्रमात्मकप्रतीतिः कुतो नेति चेन्न, रूपप्रतियोगिकत्वविशिष्टसमवायत्वावच्छिन्ननिरूपकतानिरूपिताधिकरणतायाः एव रूपसम्बन्धतया रूपप्रतियोगिकत्वविशिष्टसमवायस्य वायावभावेन रूपवान् वायुरिति प्रतीत्यभावात्।

अभावस्य वैशिष्ट्यं सम्बन्धान्तरं कुतो न? विशिष्टो घट इति प्रतीत्या यथा सम्बन्धविधया समवायः सिध्यति तथा घटाभाववद् भूतलमिति प्रतीत्याऽभावस्यापि वैशिष्ट्यनामकं सम्बन्धान्तरं सिद्ध्येदिति चेन्न; वैशिष्ट्यस्यानित्यत्वे —अनन्तवैशिष्ट्यानां सम्बन्धत्वकल्पने गौरवात्, नित्यत्वे च घटाभाववति भूतले घटानयनानन्तरमपि नित्यघटाभावस्यापि सत्त्वेन घटाभाववद् भूतलमिति बुद्धेः प्रमात्वापत्तेः।

न चाभावस्य प्रतियोग्यनुयोगिरूप'स्वरूपसम्बन्धपक्षेऽपि तदानीं घटाभावरूपप्रतियोगिनो भूतलरूपानुयोगिनश्च सत्त्वेन घटाभावसम्बन्धस्यापि सत्त्वात् तादृशबुद्धेः प्रमात्वं स्यादेवेति वाच्यम्, घटाभाववद् भूतलमिति प्रमाकालीनतत्तद्भूतलादेरेव तत्तद्भावसम्बन्धतया तदानीं तत्कालीनतद्भूतलरूपस्वरूपसम्बन्धाभावेनादोषादिति दिक्।

प्रश्नः २६—को नाम अभावः? कतिविधश्च सः? प्रत्येकं सलक्षणं सोदाहरणं प्रदर्शयत?

उत्तरम्—द्रव्यादिषट्कान्योन्याभावोऽभावः। स च द्विविधः—१—संसर्गाभावः २—अन्योन्याभावश्च। तत्र अन्योन्याभावभिन्नाभावत्वं संसर्गाभावत्वम्। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् अन्योन्याभावत्वम्। यथा—'घटो न पटः' इत्यत्र घटस्य तादात्म्यसम्बन्धेन पटे अभावः। येन सम्बन्धेन अभावो भवति स एव सम्बन्धस्तदभावीयप्रतियोगितायाः अवच्छेदको भवति। सा च प्रतियोगिता तत्सम्बन्धावच्छिन्ना प्रोच्यते।

Sri Vidyabharathi Book Centre, Srirgeri

CC-0. In Public Domain. Digitized by eGangotri

संसर्गाभावस्त्रिविधः—१–प्रागभावः, २–प्रध्वंसाभावः, ३–अत्यन्ताभावश्च । तत्र विनाश्यभावत्वं प्रागभावत्वम् । यथा–घटः उत्पत्स्यते । जन्याभावत्वं प्रध्वंसाभावत्वम् । यथा–घटो ध्वस्तः । नित्यत्वे सति संसर्गाभावत्वम् अत्यन्ताभावत्वम् । यथा–ख-पुष्पं नास्ति ।

केचित्तु 'घटो नास्ति' । 'पटो नास्ति' । इत्यादिकमपि अत्यन्ताभावस्योदाहरणं स्वीकुर्वन्ति । अत्यन्ताभावस्य नित्यत्वेऽपि यत्र भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्र घटकालस्य सम्बन्ध्यघटकतया घटात्यन्ताभावशुद्धिरिति व्याचक्षते । अन्ये पुनः 'ख-पुष्पं नास्ती'त्यादिकमेवाऽत्यन्ताभावस्योदाहरणं स्वीकृत्य घटो नास्तीत्यादौ उत्पादविनाशशाली चतुर्थोऽयं संसर्गाभाव इति स्वीकुर्वते ।

ननु "घट उत्पत्स्यते" "घटो ध्वस्त" इत्यादौ प्रागभाव-प्रध्वंसाभावस्थलेऽपि 'घटो नास्तीति' व्यवहारो भवत्येव यथा ध्वंसप्रागभावयोरधिकरणेऽपि अत्यन्ताभावसत्त्वेनाभावानां सङ्कीर्णत्वं स्यादिति चेदत्रोच्यते–नास्त्यभावानां सङ्कीर्णत्वं कार्यभविष्यद्दशायां प्रागभाव एव, विनष्टत्वे च प्रध्वंसाभाव एव, नात्यन्ताभाव इति प्राचीनं मतम् ।

श्यामघटे रक्तो नास्ति इति, रक्तघटे श्यामो नास्तीति प्रतीतिश्चापि प्रागभावं ध्वंसं चावगाहते न तु तदत्यन्ताभावम् ।

नवीनास्तु अभावानां परस्परविरोधे मानाभावाद् ध्वंसादिकालावच्छेदेनाऽपि अत्यन्ताभावो वर्तते इति प्राहुः । इति दिक् ।

प्रश्नः २७—अभावानामधिकरणात्मकत्वमाशंक्य सोपपत्तिकं तन्निराकरणं क्रियताम् ।

अथवा

अभावस्य अधिकरणात्मकत्वमेवास्तु किमतिरिक्तपदार्थत्वकल्पनया ? इति सोपपत्तिकं विवेचयत ।

उत्तरम्—ननु भावातिरिक्तपदार्थत्वकल्पनापेक्षया लाघवात् अभावानां कल्पितभावपदार्थरूपाधिकरणात्मकत्वमेव कथन्नेति चेन्न, अभावानामधिकरणात्मकत्वस्वीकारे अभावाधिकरणयोरभेदेनाधाराधेयभावानुपपत्तेः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

न च अभावाधिकरणकाभावस्याधिकरणात्मकत्वेऽप्याधाराधेयभावोपपत्तिवदभावानां भावाधिकरणरूपत्वेऽपि तदुपपत्त्या न दोषप्रसङ्ग इति वाच्यम्; तथा सति वाय्वादिनिष्ठरूपाद्यभावानां चक्षुरिन्द्रियग्राह्यवाय्वादिरूपतयाऽप्रत्यक्षत्वापत्तेस्तेषामनन्ताधिकरणात्मकत्वकल्पनापेक्षया भावातिरिक्तपदार्थत्वकल्पनाया एव लघीयस्त्वात् ।

अयं भावः—प्रत्यभावमनेकानि हि अधिकरणानि सन्ति, तत्तदभावस्थाने तत्तदभिन्नाधिकरणत्वमित्यधिकरणात्मकत्वकल्पने आनन्त्यं स्यादतस्तदपेक्षया भिन्नपदार्थकल्पने नास्ति तत्समानं गौरवम्, अपि तु लाघवमेव, अनेकेष्वधिकरणेष्वेकस्याऽभावस्य स्वीकारात् ।

एवञ्च अभावस्यातिरिक्तपदार्थस्वीकारे 'घटाभाववद् भूतलमि'त्यत्राधाराधेयभावविषयकप्रतीतिरपि सङ्गच्छते, भिन्नयोरेव पदार्थयोराधाराधेयभावनियमात् ।

एवमेव तत्तच्छब्दरसगन्धाद्यभावानामपि घ्राणादीन्द्रियैः प्रत्यक्षत्वमुपपद्यते । अभावानामधिकरणात्मकत्वस्वीकारे तु तत्तदधिकरणानां तत्तदिन्द्रियाऽग्राह्यतया प्रत्यक्षत्वं न स्यात् । एतेनात्यन्ताभावस्य ज्ञानविशेषात्मकत्वं कालविशेषात्मकत्वञ्चापि निरस्तम् इति दिक् ।

प्रश्नः २८—द्रव्यादिपञ्चानामनेकत्वं समवायित्वञ्च साधर्म्यमवादि तथा गुणादेः गुणशून्यत्वं क्रियारहितत्वञ्च साधर्म्यमवादि तत्र सर्वत्र साधर्म्यस्वरूपं तथा प्रतिपाद्यतां यथा क्वापि दोषो न प्रसज्येत् ?

उत्तरम्—ननु द्रव्य-गुण-कर्म-सामान्य-विशेषाणां पञ्चानामनेकत्वस्य साधर्म्यत्वेऽनेकत्ववत्यभावेऽतिव्याप्तिः, अनेकत्वे सति भावत्वस्य द्रव्यादीनां पञ्चानां साधर्म्यत्वे आकाशादावव्याप्तिरिति चेन्न; अनेकभाववृत्तिपदार्थविभाजकोपाधिमत्वस्य तदर्थतास्वीकारात् ।

ननु तेषां समवायित्वस्य साधर्म्यस्य सामान्यादावव्याप्तिः, समवायप्रतियोगित्वस्य तदर्थत्वेऽपि नित्यद्रव्येष्वव्याप्तिरिति चेन्न, समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वस्य तदर्थतास्वीकारात् ।

CC-O. Jangamwadi Math Collection. Digitized by eGangotri Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

न च गुणादेः गुणशून्यत्वस्याद्यक्षणे घटादावतिव्याप्तिरिति वाच्यम्, गुणवदवृत्तिधर्मवत्त्वस्य तदर्थतास्वीकारात् ।

ननु तस्य क्रियाशून्यत्वस्य साधर्म्यत्वे आकाशादावतिव्याप्तिरिति चेन्न, कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वस्य तदर्थतास्वीकारात् । इति दिक् ।

प्रश्नः २९—'पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्' इति कारिकांशो व्याख्येयः ?

उत्तरम्—परितो मण्डलम् = वर्तुलम् परिमण्डलं तस्य भावः पारिमाण्डल्यम् = अणुपरिमाणम् अणुपरिमाणभिन्नानां सर्वेषामपि कारणत्वं साधर्म्यम् । अणुपरिमाणन्तु न कस्यापि कारणम् । अणुपरिमाणं हि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् । स्वम् = अणुपरिमाणम्, तदाश्रयीभूतं द्रव्यं परमाणुः द्व्यणुकं च तदारब्धद्रव्यं द्व्यणुकं त्रसरेणुश्च, तत्परिमाणं द्व्यणुकपरिमाणं त्रसरेणु परिमाणं च तस्यैवारम्भकं भवेत् । तच्च न सम्भवति-परिमाणस्य स्वजातीयोत्कृष्टपरिमाणजनकत्वनियमेन महदारब्धस्य महत्तरत्त्ववदणुजन्यस्याणुतरत्वप्रसङ्गात् । त्रसरेणु परिमाणं हि नाणुपरिमाणसजातीयम्, अपि तु विजातीयम्, महत्त्वात् । द्व्यणुकपरिमाणं च परमाणुपरिमाणसजातीयमपि न तदुत्कृष्टम्, उत्कृष्टत्वे चाणुतरत्वप्रसङ्गापत्तेः ।

कारिकायां पारिमाण्डल्यपदं परममहत्परिमाणस्यातीन्द्रियसामान्यस्य विशेषाणां चोपलक्षणम् । तथा च न तेषामपि कुत्रापि कारणत्वम् ।

ननु विषयतया प्रत्यक्षं प्रति तादात्म्येन विषयस्य कारणत्वात् पारिमण्डल्यादेरपि योगिप्रत्यक्षे कारणत्वेन पारिमाण्डल्यभिन्नानामिति न समीचीनमिति चेन्न, योगजधर्मेणातीतानागतविषयस्यापि प्रत्यक्षत्वात् योगिप्रत्यक्षे विषयस्य कारणत्वानभ्युपगमादिति दिक् ।

प्रश्नः ३०—इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वम्, ज्ञायमानं सामान्यं न प्रत्यासत्तिः, ज्ञायमानं लिङ्गं नानुमितिकरणमित्यभिप्रायेणोक्तमिति मूलपाठो व्याख्येयः ।

Sri Vidyabharathi Book Centre, Sringeri

उत्तरम्—ननु विषयतया प्रत्यक्षं प्रति तादात्म्येन विषयस्य कारणत्वात्

CC-O. In Public Domain. Digitized by eGangotri

पारिमाण्डल्यादेरपि योगि-प्रत्यक्षे कारणत्वात् पारिमाण्डल्यभिन्नानामित्ययुक्तमिति चेन्न, योगजधर्मेणातीतानागतविषयस्यापि प्रत्यक्षत्वात् योगिप्रत्यक्षे विषयस्य कारणत्वानभ्युपगमात् । इत्यभिप्रायेणैवोक्तम्—इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वम् ।

"ज्ञायमानं सामान्यं न प्रत्यासत्तिः"

ननु ज्ञायमानसामान्यस्य प्रत्यासत्तितया पारिमाण्डल्यादेः सामान्यलक्षणाजन्यज्ञाने कारणत्वात्पुनरपि पारिमाण्डल्यभिन्नानामित्युक्तमिति चेन्न, ज्ञायमानसामान्यस्य प्रत्यासत्तित्वे यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र सामान्यलक्षणप्रत्यासत्त्या सर्वेषां तद्घटवतां भानापत्तिरतः सामान्यज्ञानस्य सामान्यलक्षण-प्रत्यासत्तितयाऽदोषात् । इत्यभिप्रायेणोक्तं ज्ञायमानं सामान्यं न प्रत्यासत्तिः ।

"ज्ञायमानलिङ्गं नानुमितिकरणम्"

ननु अनुमिति प्रति ज्ञायमानलिङ्गस्य कारणतया परमाणौ परमाण्वन्तरभेदसाधने विशेषस्य हेतुतया विशेषो न कस्यापि कारणमित्युक्तमिति चेन्न, इयं शाला अतीतं वह्निमती अतीत धूमात् इत्यनुमितेर्दर्शनेनानुमिति प्रति ज्ञायमानलिङ्गस्य कारणतया अभ्युपगन्तुमनर्हतया लिङ्गज्ञानस्यैव कारणत्वाभ्युपगमात् ।

न चैवं धूमादिति पञ्चम्यनुपपत्तिर्धूमस्याहेतुत्वादिति वाच्यम्, धूमपदस्य धूमज्ञानलक्षणया तदुपपत्तेरित्यभिप्रायेणोक्तं ज्ञायमानलिङ्गं नानुमितिकरणमिति दिक् ।

प्रश्नः ३१—अणुपरिमाणस्य कथं न कारणत्वमिति विशदमुपपाद्य आतमहत्परिमाणस्याकारणत्वमित्याचार्याशयं वदतान्तात्पर्यं प्रकाश्य कथञ्च विश्वनाथमते तन्निरास ? इति समीक्ष्यताम् ।

उत्तरम्—ननु स्वाश्रयारब्धघटपरिमाणारम्भकपालपरिमाणवदणुपरिमाणमपि स्वाश्रयजन्यं द्व्यणुकत्रसरेणुपरिमाणजनकं स्यादिति तद्भिन्नानां कारणत्वं साधर्म्यमित्यसङ्गतमिति चेन्न, तथा सति परिमाणस्य स्वसजातीयो-

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

त्कृष्टपरिमाणजनकत्वनियमान्महदारब्धस्य महत्तरत्वव्यणुकजन्यस्याणुतरत्वप्रसंगेन त्रसरेणोरप्रत्यक्षत्वापत्तेः ।

न चाणुपरिमाणस्य विषयतया योगिप्रत्यक्षे जायमानसामान्यस्य प्रत्यासत्तित्वेन सामान्यलक्षणाजन्यज्ञाने जायमानहेतोरनुमितिकरणतयाऽनुमितौ च कारणत्वात् तदसङ्गतमेवेति वाच्यम्, योगजधर्मेणातीतादिविषयके योगिप्रत्यक्षे विषयस्याकारणत्वात् तद्घटनाशानन्तरं तद्घटवतः स्मरणे सामान्यलक्षणया समेषां तद्घटवतां भानस्यानुपपत्त्या जायमानसामान्यस्य प्रत्यासत्तित्वानभ्युपगमात् अतीतादिलिङ्गकानुपपत्त्या जायमानहेतोरनुमितिकरणत्वानङ्गीकाराच्च ।

केचित्तु 'कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्यः' इति प्रशस्तपादभाष्यमुपादाय आदिपदेन परममहत्त्वं गृह्यते इति किरणावल्यामुदयनाचार्योक्त्या 'आत्मपरममहत्परिमाणमपि न कस्यापि कारणमित्यवगम्यते' इत्याहुस्तन्न, विश्वनाथमते 'कारणत्वं च ज्ञातृधर्मेतरभावकार्यापेक्षया इति तदुत्तरग्रन्थेन ज्ञानातिरिक्तं प्रत्येव । परममहत्परिमाणस्याकारणत्वस्योदयनाचार्याभिमततया ज्ञानेऽपि न कारणत्वमित्याचार्याभिप्रायस्य वक्तुमशक्यत्वात् । इति दिक् ।

प्रश्नः ३२—कारणस्य सपदकृत्यं सामान्यं लक्षणं किम ? तच्च कतिविधम् ? प्रत्येकं सलक्षणं सोदाहरणञ्च निरूप्यताम् ।

उत्तरम—अन्यथासिद्धिशून्यत्वे सति कार्यव्यवहितप्राक्क्षणावच्छेदेन नियमेन विद्यमानत्वं कारणत्वम् ।

पदकृत्यम्—दण्डत्वादौ कार्यव्यवहितप्राक्क्षणावच्छेदेन विद्यमानत्वसत्त्वादतिव्याप्तिरतस्तद्वारणाय "अन्यथासिद्धिशून्यत्वे सती"त्युक्तम् । यत्किञ्चिद्घटव्यक्तिं प्रति रासभस्य नियतपूर्ववर्तित्वमस्ति, तथापि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव तद्व्यक्तेरपि सम्भवे रासभोऽन्यथासिद्ध इति पञ्चमान्यथासिद्धमत्यपि तद्घटत्वावच्छिन्नं प्रति तद्रासभे घटत्वावच्छिन्नेऽनन्यथासिद्धतया तद्रासभेऽतिव्याप्तिवारणाय "नियते" त्युक्तम् । नियतविद्यमानत्वमित्यस्य नियतविद्यमानजातीयत्वमित्यर्थस्तेन अरण्यस्थदण्डेऽपि कारणत्वोपपत्तिरिति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तच्च कारणं त्रिविधम्—१—समवायिकारणम्, २—असमवायिकारणम् ३—निमित्तकारणञ्चेति ।

(१) यस्मिन् समवायसम्बन्धेन कार्यमुत्पद्यते तत् समवायिकारणम् । यथा घटादिकं प्रति कपालादिः ।

(२) समवायिकारणे प्रत्यासन्नं कारणम्—असमवायिकारणम् । यथा—घटादिकं प्रति कपालद्वयसंयोगादिः ।

(३) समवायिकारणासमवायिकारणाभ्यां भिन्नं कारणं निमित्तकारणम् । यथा—घटादिकं प्रति दण्डचक्रादिकम् । इति दिक् ।

प्रश्नः ३३—कारणावान्तरभेदाः के ? कानि च तेषां सपदकृत्यानि सोदाहरणानि लक्षणानि ? आत्मविशेषगुणानाञ्च कथमसमवायिकारणत्वं नास्ति ?

उत्तरम्—समवायिकारणम्, असमवायिकारणम्, निमित्तकारणञ्च—एते त्रयः कारणावान्तर-भेदाः सन्ति । तत्र—

(१) यद्रूपावच्छिन्नं स्वकारणतावच्छेदकं यद्धर्मावच्छिन्ने समवायसम्बन्धेनोत्पद्यते तद्धर्मावच्छिन्नं कार्यं प्रति तद्धर्मावच्छिन्नं समवायिकारणम् । यथा—घटत्वावच्छिन्नं प्रति कपालत्वाद्यवच्छिन्नं समवायिकारणम् ।

अत्र द्रव्यत्वादेर्घटादि समवायिकारणतावच्छेदकत्ववारणाय लक्षणे स्वकारणतावच्छेदकेत्युक्तम् ।

(२) समवाय-स्वसमवायिसमवेतत्वान्यतरसम्बन्धेन कारणत्वे सति आत्मविशेषगुणान्यत्वम् असमवायिकारणत्वमिति ।

यथा—कपालद्वयसंयोगः घटस्य असमवायिकारणम् । कपालरूपञ्च घटरूपस्य असमवायिकारणम् ।

अत्र पटासमवायिकारणस्य तन्तुसंयोगस्य पटरूपासमवायिकारणस्य तन्तुरूपस्य च संग्रहाय समवाय-स्वसमवायि-समवेतत्वयोः प्रवेशः । आत्मविशेषगुणान् वारयितुं लक्षणे आत्मविशेषगुणान्यत्वमित्युक्तम् ।

(३) समवायिकारणत्वासमवायिकारणत्वभिन्नकारणत्वमेव निमित्तकारणत्वम् । यथा—घटादिकं प्रति दण्डचक्रादिकं निमित्तकारणम् ।

ननु आत्मविशेषगुणानामप्यसमवायिकारणत्वमस्तु इति चेन्न, नीलतन्तुभ्यो रक्तपटोत्पत्तिवारणाय विशेषगुणानां स्वजातीयविशेषगुणासमवायि-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कारणकत्वनियमाभ्युपगमेन—ज्ञानादीनामिच्छादिकं प्रति साजात्याभावेनासमवायिकारणत्वासम्भवत्वप्रसङ्गादिति दिक्।

प्रश्नः २४—अन्यथासिद्धभेदाः कति ? तेषां लक्षणानि उदाहरणानि च कानि ? तृतीयचतुर्थान्यथासिद्धयोरन्यं प्रति पूर्ववृत्तिविशेषणस्य तुल्यतया कथन्नाभेदः ?

उत्तरम्—अन्यथासिद्धस्य पञ्च भेदाः सन्ति। तेषां सोदाहरणानि लक्षणानि यथा—(१) यत्कार्यम्प्रति कारणस्यं पूर्ववृत्तिता येन रूपेण गृह्यते तत्कार्यम्प्रति तद्रूपमन्यथाद्धिम्। यथा घटम्प्रति दण्डत्वम्।

(२) यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः, किन्तु कारणमादायैवान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धम्। यथा घटं प्रति दण्डरूपम्।

(३) अन्यम्प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यम्प्रत्यन्यथासिद्धत्वम्। यथा घटादिकम्प्रत्याकाशस्य। तस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात्। आकाशत्वं हि शब्दसमवायिकारणत्वम्। एवञ्च तस्य शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम्।

(४) यत्कार्यजनकं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यम्प्रति पूर्ववर्तित्वं गृह्यते तस्य तत्कार्यम्प्रत्यन्यथासिद्धत्वम्। यथा—घटं प्रति कुलालपिता। तस्य हि कुलालपितृत्वे घटम्प्रति जनकत्वेऽन्यथासिद्धिः।

(५) अवश्यकल्पनियतपूर्ववर्तिन एव कार्यसम्भवे तद्भिन्नत्वमन्यथासिद्धत्वम्। यथा—घटम्प्रति रासभादिः।

एतेषु पञ्चसु अन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आवश्यकः, तेनैव परेषां चरितार्थत्वात्। तथाहि—दण्डादिभिरवश्यकल्पनियतपूर्ववर्तिभिरेव कार्यसम्भवे दण्डत्वादिकमन्यथासिद्धम्।

न च तृतीयचतुर्थान्यथासिद्धयोरन्यं प्रति पूर्ववृत्तित्वविशेषणस्य तुल्यतयाऽभेदापत्तिरिति वाच्यम्। तृतीयलक्षणे अन्यपदेन प्रकृतकार्याजनकस्य, चतुर्थे स्वकारणपदेन प्रकृतकार्याजनकस्य ग्रहणादिति दिक्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नः ३५--आत्ममानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात् परममहत्परिमाणस्यापि कारणत्वं कुतो न ?

उत्तरम्—ननु आत्ममानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वेन परममहत्परिमाणं न कस्यापि कारणमित्ययुक्तमिति चेन्न, आत्मपरममहत्त्वातिरिक्तपरममहत्परिमाणं न कस्यापि कारणमिति स्वीकारेणादोषात् ।

एवञ्च 'कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्यः' इति प्रशस्तपादभाष्यमुपादाय आदिपदेन परममहत्त्वं गृह्यते इति किरणावल्यामुदयनाचार्योक्त्या परममहत्परिमाणस्य न कारणत्वमिति दिक् ।

प्रश्नः ३६--केषां कीदृशं मूर्त्तत्वं च साधर्म्यमिति तथा विविच्यतां यथा क्वापि दोषो न प्रसज्येत । परिष्कृतमूर्त्तत्वभूतत्वघटकपदव्यावृत्तिश्च लिख्यताम् ।

उत्तरम्—**कीदृशं मूर्त्तत्वं साधर्म्यम्**—पृथिव्यप्तेजोवायुमनसामपकृष्टपरिमाणवत्त्वरूपं मूर्त्तत्वं साधर्म्यम् । न च परमाणुपरिमाणस्यापकृष्टत्वाभावात्तत्राव्याप्तिरिति वाच्यम्, अपकृष्टपरिमाणवत्त्वमित्यस्य परममहत्परिमाणवत्त्वमित्यर्थे तात्पर्येण दोषाभावात् ।

न च अपकृष्टपरिमाणवत्त्वमित्यस्य परममहत्परिमाणभिन्नपरिमाणवत्त्वमित्यर्थे तात्पर्येणापि घटादावव्याप्तिरिति वाच्यम्, अविभुवृत्तिपरिमाणसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । आत्मन्यतिव्याप्तिवारणाय समानाधिकरणान्तम् । सत्तामादाय तत्रैवातिव्याप्तिवारणाय द्रव्यत्वव्याप्येति । आकाशपृथिव्यन्यतरत्वमादायाकाशेऽतिव्याप्तिवारणाय जातीति । अत्र जातिमत्त्वञ्च समवायेन बोध्यम् ।

भूतत्वं साधर्म्यम्—पृथिव्यप्तेजोवाय्वाकाशानां बहुरिन्द्रियग्राह्यविशेषगुणवत्त्वरूपं भूतत्वं साधर्म्यम् अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वम् । अन्तरिन्द्रियग्राह्यसुखादिरूपविशेषगुणस्यात्मनि सत्त्वेनातिव्याप्तिवारणाय बहिः पदम् । परमाणुरूपादेरप्रत्यक्षतया बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वस्य परमाणावव्याप्तिरतो बहिरिन्द्रियग्राह्यजातिमद्विशेषगुणवत्त्वं भूतत्वमिति वक्तव्यम् । ततश्च संयोगिप्रत्यक्षे [illegible] प्रत्यक्षस्य कारणतया कालादिवृत्ति-

CC-O. In Public Domain. Digitized by eGangotri Sri Vidyabharati Foundation, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

संयोगस्याप्रत्यक्षत्वेऽपि बहिरिन्द्रियग्राह्यजातिमत्त्वस्य तादृशसंयोगेऽपि सत्त्वेन कालादावतिव्याप्तिरतो विशेषेति । द्रव्यत्वमादाय पुनः कालादावतिव्याप्तिवारणाय गुणेति दिक् ।

प्रश्नः ३७—अव्याप्यवृत्तित्वं क्षणिकत्वं च किम् ? अव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं च कथं केषां साधर्म्यम् ? योग्यविभुविशेषगुणनाशम्प्रति कस्य केन सम्बधेन कारणता ?

उत्तरम्—स्वप्रतियोगित्व-स्वसामानाधिकरण्योभयसम्बन्धेनाऽभावविशिष्टत्वम् अव्याप्यवृत्तित्वम् । आकाशस्य विशेष गुणः शब्दः स चाऽव्याप्यवृत्तिः । यदा किञ्चिदवच्छेदेन शब्दः आकाशे उत्पद्यते, तदाऽन्यावच्छेदेन शब्दाभावस्यापि आकाशे सत्त्वात् ।

क्षणिकत्वम्—तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम् ।

अव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं च कथं केषां साधर्म्यम् —

यदा आकाशे किञ्चिदवच्छेदेन शब्दस्य अन्यावच्छेदेन शब्दाभावस्य च सत्त्वात् शब्दस्य तृतीयक्षणे नाशाच्च, एवमेवात्मनि शरीरावच्छेदेन ज्ञानस्य घटाद्यवच्छेदेन ज्ञानाभावस्य च सत्त्वात् ज्ञानस्य तृतीयक्षणे नाशाच्च आकाशात्मनाम् अव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं च साधर्म्यम् ।

योग्यविभुविशेषगुणनाशम्प्रति कस्य केन सम्बन्धेन कारणत्वम्—

प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशम्प्रति स्व-सामानाधिकरण्यस्वाव्यवहितपूर्ववृत्तित्वोभयसम्बन्धेन योग्यविभुविशेषगुणस्य—कारणत्वमिति दिक् ।

प्रश्नः ३८—चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वादिति ग्रन्थः केनाशयेनोत्थितः ? तद्घटकपदानां व्यावृत्तिश्च का ?

उत्तरम्—ननु रूपादीनामपि कदाचित् तृतीयक्षणे नाशसम्भवात् क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति चेन्न, चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य क्षणिकविशेषगुणवत्त्वार्थत्वात् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हेतुघटकपदानां व्यावृत्तिः—ज्ञानत्वादेर्जन्यवृत्तित्वादसम्भवदोषवारणाय चतुःक्षणवृत्तीत्युक्तम्। चतुःक्षणवृत्त्यवृत्तीत्याद्युक्तौ ईश्वरज्ञानस्य नित्यतया चतुःक्षणवृत्तित्वेन ज्ञानत्वस्यातादृशत्वात्तदादाय समन्वयो न स्यादतो जन्येत्युक्तम्। चतुःक्षणवृत्तिजन्यापरममहत्त्वजातिमद्गुणवत्त्वस्य कालादौ सत्त्वादतिव्याप्तिरतो विशेषेत्युक्तम्।

प्रश्नः ३९—चाक्षुषलौकिक-प्रत्यक्ष-विषय-वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वादिति हेतुना कुत्र कीदृशी शङ्का निराकृता? तादृशहेतुघटक-चाक्षुषलौकिकपदयोः व्यावृत्तिश्च का?

उत्तरम्—ननु पृथिव्यप्तेजसां साधर्म्यं प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तम्, अतिव्याप्तं रूपादाविति चेन्न; चाक्षुषलौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्।

हेतुघटकचाक्षुषलौकिकपदयोर्व्यावृत्तिः—

आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति। घटो वायुमानिति वाक्यांशे ज्ञानलक्षण-प्रत्यासत्त्या चाक्षुषविषयवायुवृत्तिद्रव्यत्वव्याप्यवायुत्वजातिमति वायावतिव्याप्तिवारणाय लौकिकेति पदनिवेशः। इति दिक्।

प्रश्नः ४०—"यद् द्रव्यं यद् द्रव्यध्वंसजन्यन्तदुपादानोपायमि"ति विश्वनाथः। कथमुत्थितेयं व्याप्तिः? क्व कथं दृष्टान्तता? प्रकृतव्याप्ति-घटकपदानां व्यावृत्तिश्च का? शालग्रामशिलाध्वंसजन्य-नारकीयशरीरे व्यभिचारश्च कथं वारणीयः?

उत्तरम्—ननु गन्धवत्त्वस्य पृथिवीलक्षणत्वे गन्धाभावात् पाषाणेऽव्याप्तिरिति चेन्न, पाषाणो गन्धवान् पृथिवीत्वात् पुष्पवदित्यनुमानेन पाषाणेऽपि गन्धसिद्धेः।

न च पाषाणस्य पृथिवीत्वे एव किम्मानमिति चेन्न, पाषाणः पृथिवी, गन्धवद् द्रव्यारब्धत्वात् घटवदित्यनुमानस्यैव पाषाणस्य पृथिवीत्वे प्रमाणत्वेन स्वीकारात्।

ननु पाषाणावयवानां गन्धवत्त्वे किम्मानमिति चेन्न, पाषाणावयवाः, गन्धवन्तः, गन्धवद्द्रव्यारम्भकत्वात् इत्यनुमानस्यैव प्रमाणत्वात् पाषाणावयवेषु गन्धसिद्धेः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

न च भस्मनः पाषाणावयवारब्धत्वे किं मानमिति वाच्यम्, भस्म-पाषाणोपादानोपादेयं पाषाणध्वंसजन्यत्वात्, 'यदद्रव्यं यद् द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयम्' महापटध्वंसजन्यखण्डपटवदित्यनुमानस्यैव प्रमाणत्वेन स्वीकारात् ।

प्रकृतव्याप्तिघटकपदानां व्यावृत्तिः

व्याप्तौ घटध्वंसप्रत्यक्षे घटोपादानानुपादेये व्यभिचारवारणाय प्रथमं द्रव्य-पदम् । अथवा घटध्वंसजन्यरूपध्वंसे व्यभिचारवारणाय तत् । नवीनमते-मिथ्या-ज्ञानध्वंसजन्यकायव्यूहे, दण्डप्रागभावध्वंसजन्ये घटे वा व्यभिचारवारणाय द्वितीयं द्रव्यपदम् । प्रतिबन्धकद्रव्यात्यन्ताभावजन्ये द्रव्ये व्यभिचारवारणाय ध्वंसपदम् । अत्र ध्वंसजन्यत्वं चादृष्टद्वारकत्वेन विवक्षितम्, अत एव शाल-ग्रामशिलाध्वंसजन्यनारकीयशरीरे न व्यभिचार इति दिक् ।

प्रश्नः ४१—पृथिव्याः किं लक्षणम् ? कतिविधा च सा ? इति भेदप्रभेद-प्रदर्शनपुरस्सरं सोपपत्तिकं निरूप्य पृथिवीत्वजातौ मानमुपस्थापयत ?

उत्तरम्—'तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता । षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ।।' इत्यत्र पृथिवीलक्षणे गन्धहेतुत्वस्य पृथिवीलक्षण-त्वाङ्गीकारे कालादावतिव्याप्तिमत आह—गन्धसमवायिकारणमिति । तथा च 'गन्धत्वावच्छिन्नसमवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छि-न्नकारणतावत्त्वं' पृथिव्यालक्षणं निष्पन्नम् ।

ननु सुरभ्यसुरभिकपालाभ्यामारब्धो घटो निर्गन्ध एव, नहि तत्र सुरभि-गन्ध उत्पत्तुमर्हति, समवायेन सुरभिगन्धं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन सुरभिगन्धातिरिक्तगन्धत्वेन प्रतिबन्धकत्वात् । न वा असुरभिगन्धः समवायेन असुरभिगन्धं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन असुरभिगन्धातिरिक्तगन्धत्वेन प्रतिबन्धकत्वात् । न वा चित्रगन्धस्तस्य, प्रामाणिकैरभ्युपगमात्तत्र गन्धवत्त्वो-पलम्भश्चावयवगन्धेनैवेति तादृशघटे गन्धसमवायिकारणत्वस्याभावेनाव्याप्ति-रिति चेन्न, स्वरूपयोग्यतारूपकारणतायास्तत्र सत्त्वेनादोषात्, पदार्थतत्त्व-निरूपणे शिरोमणिभिः तादृशघटे अव्याप्यवृत्तिगन्धोत्पत्तेरेवाभिमततया फलो-पधायकतारूपकारणतायास्तत्र सत्त्वाच्च ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

न च व्याप्यवृत्त्यव्याप्यवृत्तिजातीययोर्विरोध इति वाच्यं, मानाभावात्। उक्तप्रतिबध्य-प्रतिबन्धकभावश्च हेय एव गौरवात्। एतेन चित्ररूपमपि प्रत्याख्यातम्।

ननु उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठतीति नियमात् उत्पत्ति-कालिके घटे गन्धवत्त्वाभावादव्याप्तिरिति चेन्न, गन्धवत्त्वमित्यनेन गन्धवद् वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षणेनादोषात्। द्रव्यत्वव्याप्यजलत्वजाति-मादाय जलेऽतिव्याप्तिवारणाय वृत्त्यन्तम्। सत्तामादाय जलादावतिव्याप्ति-वारणाय द्रव्यत्वव्याप्येति।

लक्षणे गन्धवत्त्वं वृत्तित्वं च समवायेन, समवायेन गन्धोऽन्यत्र कुत्रापि न विद्यते, पृथिव्यान्तु सर्वत्र गन्धः समवायेन विद्यते एवेति भवति लक्षण-समन्वयः।

न च गन्धवत्त्वस्य पृथिवीक्षणत्वे गन्धाभावात् पाषाणेऽव्याप्तिरिति वाच्यम्। पाषाणो गन्धवान् पृथिवीत्वात् पुष्पवदित्यनुमानेन पाषाणेऽपि गन्धसिद्धेः।

सा च पृथिवी द्विविधा—१–नित्या। २–अनित्या च। तत्र अणुलक्षणा परमाणुरूपा पृथिवी नित्या तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिरूपा सर्वाप्यनित्या। सैव अवयववती उच्यते। सा च अनित्या कार्यरूपा पृथिवीशरीरेन्द्रियविषयभेदात् त्रिधा। तत्र शरीरं द्विविधम्—(१) योनि-जम्, (२) अयोनिजञ्च। योनिजमपि द्विविधम्—जरायुजम् अण्डजञ्च। तत्र जरायुजं शरीरं मानुषादीनाम्। अण्डजं सर्पादीनाम्। अयोनिजम् स्वेद-जोद्भिज्जादीनाम्। तत्र स्वेदजः कृमिदंशाद्याः। उद्भिज्जाः तरुगुल्माद्याः। इन्द्रियं घ्राणं पार्थिवम्। विषयः–उपभोगसाधनम्।

पृथिवीत्वजातौ मानम्

ननु 'इयं पृथिवी' इत्यनुगता प्रतीतिर्घृतजतुप्रभृतिषु नास्तीति न तया पृथिवीत्वजातिसिद्धिसम्भव इति पृथिवीत्वजातौ किं मानमिति चेन्न, 'सम-वायेन गन्धं प्रति तादात्म्येन पृथिवीकारणम्' इति कार्यकारणभावात् सम-वायसम्बन्धावच्छिन्नगन्धाभावाभावीयतादात्म्यसम्बन्धा

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

वच्छिन्न पृथिवीनिष्ठाकारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्युनुमानेन पृथिवीत्वजातिसिद्धेरिति दिक् ।

प्रश्नः ४२—अवयविनमभ्युपगच्छतां मतमुपपाद्य निरस्य च निजमतेनावयविसाधनप्रकारः समुपपाद्यताम् ?

उत्तरम्—ननु घटादेः विलक्षणसंस्थानविशिष्ट परमाणुपुञ्जरूपत्वेऽप्ययं घट इति प्रतीत्युपपत्त्याऽवयविकल्पना व्यर्था । न च परमाणूनामतीन्द्रियत्वाद् घटादीनां प्रत्यक्षं न स्यादिति वाच्यम्, एकस्य केशस्य दूरेऽप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्ववदेकपरमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वसम्भवादिति चेन्न, परमाणोरतीन्द्रियत्वेन तत्समूहस्याऽपि प्रत्यक्षत्वायोगात्, दूरस्थकेशस्तु नाऽतीन्द्रियः, सन्निधाने तस्यैव प्रत्यक्षत्वात् :

न चादृश्यद्व्यणुकाद् दृश्यत्रसरेणूत्पत्तिवददृश्यपरमाणुपुञ्जाद् दृश्यपरमाणुपुञ्जोत्पत्त्युपगमान्नदोष इति वाच्यम्, मन्मते उपादानोपादेय भावेऽपि दृश्यत्वप्रयोजकमहत्त्वोद्भूतरूपादिकारणकूटवत्त्वात् त्रसरेणौ दृश्यत्वस्य तदभावात् द्व्यणुकेऽदृश्यत्वस्य चोपपत्तौ अपि परमाणौ महत्त्वाभावेन त्वन्मते तत्पुञ्जेऽपि दृश्यत्वस्यानुपपत्तेः ।

एवञ्च घट इत्यादि-प्रतीतिविषयताया अनेकपरमाणुषु कल्पने गौरवादवयविकल्पनमेव वरमिति दिक् ।

प्रश्नः ४३—पाषाणादीनां पार्थिवत्वमनुमानप्रणाल्या ग्रन्थदिशा संसाधनीयम् ? (१९८६)

उत्तरम्—ननु समवायेन गन्धवत्त्वं पृथिवीत्वमिति पृथिव्या लक्षणस्य गन्धवत्त्वस्य पार्थिवत्वमिति चेन्न, पाषाणो गन्धवान्, गन्धवदुपादानोपदेयत्वात्, यत् गन्धवदुपादानोपादेयं तद्गन्धवत् यथा घटः इत्यनुमानेन गन्धसत्त्वात् पाषाणादीनां पार्थिवत्वसिद्धेः ।

न च गन्धवदुपादानोपादेयत्वमेव पाषाणादौ नास्ति, कुतस्तत्र गन्धवत्त्व सिद्धिरिति वाच्यम्, 'यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तदुपादानोपादेयम् इति व्याप्त्या महापटध्वंसजन्ये तन्तुपटे महापटोपादानोपादेयत्वं दृष्टम्, तथैव पाषाणध्वंसजन्ये पाषाणभस्मनि पाषाणोपादानोपादेयत्वसिद्धेः । भस्मारब्धक-

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

पाषाणारम्भकपरमाणूनामेकजातीयत्वेन पाषाणारम्भक परमाणुषु पार्थिवत्वसिद्धौ परमाणुजन्यानां पाषाणादीनां पार्थिवत्वसिद्धेः। एव च पाषाणः पार्थिवः पार्थिवपरमाणुजन्यत्वात्, घटवदित्यनुमानेन पाषाणादीनां पार्थिवत्वं सिद्ध्यतीतिदिक्।

प्रश्नः ४४—पारिमांडल्यभिन्नपदार्थानां सादृश्यं स्वाधीतग्रन्थदिशा सम्यक् प्रतिपादनीयम्। (१९८६)

उत्तरम्—पारिमांडल्यम्—अणुपरिमाणम्, तत्र परमाणुपरिमाणं द्व्यणुकपरिमाणञ्च। अणुपरिमाणभिन्नानां कारणत्वं साधर्म्यम्। अणुपरिमाणन्तु न कस्यापि साधर्म्यम्। अणुपरिमाणं हि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत्। स्वमणुपरिमाणं तदाश्रयीभूतं द्रव्यं परमाणुर्द्व्यणुकं च, तदारब्धं द्रव्यं द्व्यणुकं त्रसरेणुञ्च, तत्परिमाणं—द्व्यणुकपरिमाणं त्रसरेणुपरिमाणं च तस्यैवारम्भकं भवेत्। ततश्च परिमाणस्य स्वजातीयोत्कृष्ट परिमाणजनकत्वनियमेन महदारब्धस्य महत्तरत्ववदणूजन्यस्याणुतरत्वप्रसंगात्।

कारिकायां पारिमाण्यल्पपदं परममहत्परिमाणस्थातीन्द्रियसामान्यस्य विशेषाणां चोपलक्षणम्। तथा च तेषामपि न कुत्रापि कारणत्वम्।

ननु विषयतया प्रत्यक्षम्प्रति तादात्म्येन विषयस्य कारणत्वात् परिसाण्डल्यादेरपि योगिप्रत्यक्षे कारणतया पारिमण्डल्यभिन्नानामिति न युक्तमितिचेन्न, योगजधर्मेणातीतानागतविपयस्यापि प्रत्यक्षत्वाद् योगिप्रत्यक्षे विषयस्य कारणत्वानभ्युपगमात्। अत एवोक्तं मुक्तावलीकारेण 'इदमपि योगिप्रत्यक्षे विपयस्य न कारणत्वम्।"

ननु ज्ञायमानसामान्यस्य प्रव्यासत्तितया पारिमाण्डल्यादेः सामान्यलक्षणा जन्यज्ञाने कारणत्वात् पुनरपि पारिमाण्डल्यभिन्नानामित्ययुक्तमिति चेन्न, ज्ञायमानसामान्यस्य प्रत्यासत्तित्वे यत्रघटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र सामान्यलक्षणप्रत्यासत्त्या सवेषां तद्घटवतां भानानापत्तिरतः सामान्यज्ञानस्य सामन्यलक्षणप्रत्यासत्तितयाऽदोषात्। अतो युक्तमेवोक्तं पारिमाण्डल्यभिन्नपदार्थानामेव कारणवं साधर्म्यमितिदिक्।)

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नः ४५—परमाणुसाधनरीतिः का ?

उत्तरम्—अवयविसिद्धौ तेषाम्—अवयविनाम्-अवयवधारायाः अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसंगः। अस्तस्याः अवयवधारायाः क्वचिद्विश्रामोवाच्यः। यत्र तु विश्रामस्तन्नित्यम्, अशमवेत-भावकार्योत्पत्तिप्रसङ्गात्। यत्र च इयमवयवधारा विश्राम्यति तत्रैवाऽणुपरिमाणतारतम्यमपि विश्राम्यतीति तस्य परमाणुत्वं सिद्धयति। तथाहि—महत्परिमाणतारतम्यं यथाऽऽकाशादौ विश्राम्यति तथैवाणुपरिमाणतारतम्यमपि क्वचिद् विश्राम्येत, यत्र च विश्रामः स एव परमाणुः।

न च तस्या अवयवधारायाः त्रसरेणावेव द्व्यणुके एव वा विश्रामोऽस्त्विति वाच्यम्, त्रसरेणुः सावयवः, चाक्षुषद्रव्यत्वात्, घटवदित्यनुमानेन तदवयवसिद्धौ, त्रसरेणोवरवयवाः सावयवाः, महदारम्भकत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः।

न च एवं क्रमेण तदवयवधाराऽपि सिद्धचेदिति वाच्यम्; अनवस्थाभयेन तदसिद्धेरित्थमन्तिमोऽवयवः' परमाणुरितिदिक्।

प्रश्नः ४६—अवयव-साधनरीतिः स्वमतेन समुपपाद्यताम्।

उत्तरम्—ननु अवयवी स्वावयवेषु कात्स्न्र्येन एकदेशेन वा वर्तते ? नाऽऽद्यः, एकत्र सम्बद्धे द्वितीयावयवसम्बन्धासम्भवप्रसङ्गात्। न द्वितीयः अवयवव्यतिरिक्तस्यैकदेशस्याप्रसिद्धेः। किञ्च यदेकं तदेकत्रैव वर्तते, यथा रूपम्, एकश्चावयवी बौद्धाभिमतः स कथं नामाऽवयववेषु स्थास्यति ? अपि च, यदनेकवृति, तदनेकम्, यथाऽनेकभाजनगतानि तालफलानि इति कथमवयवि सिद्धिरिति चेन्न। वृत्तित्वे कृत्स्नैकदेशविकल्पस्याप्रामाणिकत्वात्। यद्वर्तते तदाश्रयाश्रितभावलक्षणयावृत्त्या वर्तते, न चैकस्यानेकस्मिन् सम्बन्धोत्सेकेषां वा एकस्मिन् सम्बन्धोऽदृष्टः। प्रथमे नानामणिगतस्य सूत्रस्य, द्वितीये रूपरसगन्धादेरेव दृष्टान्तत्त्वादिव्यवयवि-साधनरीतिरिति दिक्।

प्रश्नः ४७—सपदकृत्यं शरीरलक्षणं किम् ? मानवशरीराणां पार्थिवत्वे किं मानम् ? सति पार्थिवत्वमात्रे तत्रकथं पांचभौतिकत्वव्यवहारः ? नृसिंहशरीरे कथंलक्षणसमन्वयः ? वृक्षादीनां च शरीरत्वे किं मानम् ?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

उत्तरम्—अन्त्यावयवित्वे सति चेष्टा श्रयत्वं शरीरत्वमिति शरीरस्य लक्षणम्। अन्त्यावयवित्वं च द्रव्यानारम्भकं द्रव्यत्वम्। हस्तादावतिव्याप्तिवारणाय लक्षणे 'अन्त्यावयवित्वे सति' इति पद-निवेशः। घटत्वमादाय घटेऽतिव्याप्तिवारणाय 'चेष्टाश्रयत्वमि'ति पदनिवेशः।

मानवशरीराणां पार्थिवत्वे मानम्—

ननु जन्मादिषु सत्स्वपि मानवशरीराणां कथं पार्थिवत्वमिति चेन्न। गन्धादिमत्त्वस्यैव तत्र प्रमाणत्वेन मानवशरीराणां पार्थिवत्वसिद्धेः। न च क्लेदोष्मादीनामपि तत्र सत्त्वात् आप्यत्वादिकमपि तत्र सिद्ध्यतीति वाच्यम्। तथा सति जलत्व पृथिवीत्वादिना तत्र सङ्करप्रसङ्गात्। न च तर्हि जलत्वादिकमेव तत्रास्तु ननु पार्थिवत्वमिति वाच्यम्। क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात् गन्धाद्युपलब्धेश्च पार्थिवत्वसिद्धेः। एतेन पार्थिवशरीरे जलदीनां निमित्तत्वमात्रमेव बोध्यम्।

सति पार्थिवत्वमात्रे कथन्तत्र पांचभौतिकत्वव्यवहारः—

सत्यपि पार्थिवत्वे जलादीना चतुष्टयस्य निमित्तकारणत्वादेव मानवानां शरीरे पांचभौतिकत्वव्यवहारः सिद्ध्यति।

नृसिंहशरीरे लक्षण-समन्वयः—

ननु नृसिंहत्वस्य एकव्यक्तिवृत्तितया जातित्वाभावात् जलीयतेजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावात् नृसिंहशरीरे कथं लक्षण-समन्वय इति चेन्न। कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयादिति दिक्।

वृक्षादीनां च शरीरत्वे किंमानम् ?

न च वृक्षादीनां शरीरत्वे किं मानमितिवाच्यम्। अवयवोपचयानुमितप्राणसम्बन्धस्य मानत्वात्। ननु वृद्धयादिकारणभूतवायोः प्राणत्वे मानाभाव इति चेन्न। 'गुरु' हुंकृत्य तुकृत्य विप्रं निर्जित्य वादतः। श्मशाने जायते वृक्षः कङ्कगृध्रोपसेवितः।" इत्यागमस्यैव तत्र मानत्वादिति दिक्।

प्रश्नः ४८—घ्राणेन्द्रियस्य पार्थिवत्वं संसाध्य तत्साधकहेतुघटपदव्यावृत्तिरभिधीयताम्।

CC-O. In Public Domain. Digitized by eGangotri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

उत्तरम्—घ्राणेन्द्रिस्य पार्थिवत्वसाधनम्-घ्राणेन्द्रियस्य कथं पार्थिवत्वमिति चेन्न। घ्राणेन्द्रियं पार्थिवं, रूपादिषु मध्ये गन्धस्याऽभिव्यञ्जकत्वात् कुंकुमगन्धाभिव्यञ्जक गोघृतवदित्यनुमानस्य प्रभाणत्वात्। न च दृष्टान्ते स्वीयरूपाद्यभिव्यञ्जकत्वात्तदसिद्धिरिति वाच्यम्। परकीयरूपाद्यभिव्यञ्जकत्वस्य तदर्थत्वात्।

न च नवशरावगतगन्धव्यञ्जकजलेऽनैकान्तिकत्वमिति वाच्यम्। तस्य सक्तुरसाभिव्यञ्जकत्वात्। वायूपनीतसुरभिभागानां दृष्टान्तत्वसम्भवात् परकीयेति न देयम। न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्राभिव्यञ्जकत्वात्तत्र व्यभिचार इति वाच्यम्। द्रव्यत्वे सति इति विशेषणेन व्यभिचाराभावप्रसंगात्। इतिदिक्।

प्रश्नः ४९—जलत्वजातिसिद्धौ दिनकरीरीत्या प्रमाणमुद्भाव्यताम्।

(१९८६)

अथवा

जलत्वजातिसिद्धिप्रकारः प्रदर्श्यताम्।

उत्तरम्—ननु हिमादिषु-पामराणां इदं जलम्-इदं जलमिति प्रतीतेरभावेन जलत्वजातौ प्रत्यक्षप्रमाणाभावात् तत्र किं मानमिति चेन्न। समवायेन स्नेहं प्रति तादात्म्येन जलं कारणम्—इति कार्यकारणभावात् समवायसम्बन्धावच्छिन्नकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, इत्यनुमाने स्नेहसमवायिकारणतावच्छेदकविधया जलत्वजातिसिद्धेः।

ननु स्नेहनिष्ठकार्यतावच्छेदकत्वं स्नेहत्वस्य न सम्भवति, अन्यूनानतिप्रसक्तधर्मस्यैवावच्छेदकत्वनियमेन स्नेहस्य नित्यानित्यवृत्तितया कार्यतातिरिक्तवृत्तित्वात्। एवञ्च स्नेहत्वावच्छिन्नकार्यत्वाप्रसिद्धया तन्निरूपितकारणतारूपपक्षाप्रसिद्धौ नोक्तानुमानसम्भव इति चेन्न। स्नेहत्वस्यातिप्रसक्तत्वेऽपि जन्यस्नेहत्वस्यानतिप्रसक्तया समवायसम्बावच्छिन्नजन्यस्नेहत्वावच्छिन्नकार्यतानिरूपिता तादात्म्यसम्बन्धावच्छिन्ना जलनिष्ठा कारणता, किञ्चिद्धर्मावच्छिन्ना, कारणतात्वादित्यनुमानेन जलत्वजातिसिद्धिसम्भवात्।

Sri Jagadguru Rambhacharya Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ननु एवमपि परमाणौ जन्यस्नेहाभावेन जन्यस्नेहत्वावाच्छिन्नकार्यता-निरूपितकारणतायास्तत्राभावेन जलत्वस्य कारणताऽतिरिक्तवृत्तिताया न सिद्धि-सम्भवः, किन्तु जन्यजलत्वस्यैव ।

न च स्वरूपयोग्यतारूपकारणतायास्तत्रापि सत्त्वमिति वाच्यम् । नित्यस्य स्वरूपयोग्यता फलावश्यम्भावनियमेन स्वरूपयोग्यतारूपकारणताया अपि तत्रासम्भवादिति वाच्यम् । जन्यस्नेहत्वावच्छिन्नकार्यतानिरूपितकारणता-वच्छेदकविधया पूर्वोक्तानुमानेनजन्यजलत्वसिद्धौ समवाय-सम्बन्धावच्छिन्न-जन्यजलत्वावच्छिन्नकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्नाजलनिष्ठा-कारणता सा किञ्चिद्धर्मावच्छिन्ना, कारणतात्वादित्यनुमानेन जलत्वजाति-सिद्धिरित्यदोषात् । इति दिक् ।

प्रश्नः ५०—जले शुक्ल एव वर्णः, मधुर एवं रसः, शीत एवं स्पर्शः इति चितयमेव सम्यक् प्रतिपाद्यताम् ।

उत्तरम्—जले शुक्ल एव वर्णः—ननु जले शुक्ले एव वर्ण इति न संग-च्छते, कालिन्दीजलादौ नीलिमोपलब्धेरिति चेन्न । जले नीलजनकतावच्छेदक-जातेरभावात् । नीलरूपासम्भवेन कालिन्दीजले नीलत्वप्रतीतेराश्रयौपाधिकत्वा-ऽभ्युपगमात् । अत एव आकाशे विक्षिप्ते जले सर्वत्र शौक्ल्योपलब्धिः ।

जले मधुर एव रसः—इति न संगच्छते प्रमाणाभावात् । नहि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूयते येन तत्र रसस्य निश्रयो भवेत् । तिक्तादिविलक्षण-रसानुभवेन मधुररसकल्पनमिति चेन्न । निदाघ पीतनिर्मलगङ्गाजल-माधुर्यस्य प्रत्यक्षसिद्धत्वात् । अत एव जले मधुर एव रसः ।

'जले शीत एव स्पर्शः—इत्यपि न संगच्छते, उष्णजलादावुष्णप्रतीतेरपि सम्भवात् । ननु तेजसस्तदौष्ण्यमिति चेन्न । रूपवत्स्पर्शप्रत्यक्षस्य रूपप्रत्यक्ष-व्याप्यत्वेन तेजसोऽपि चाक्षुषत्वापत्तेः । ऊष्मादिषु रूपप्रत्यक्षमन्तरेणाऽपि स्पर्शप्रत्यक्षस्याऽनुभविकत्वेन वह्निसंयोगाधिक्येन च तत्रौष्माधिक्यप्रतीतेर-नुभवसिद्धतया जले शीतस्पर्शकल्पनादिति दिक् ।

प्रश्नः ५१—करकादेर्जलत्वसिद्धौ 'यद द्रव्यध्वंस जन्यमि' इत्यादिव्याप्तेः कथमुपयोगिता ?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

उत्तरम्—ननु करकादेः कठिनत्वात् पार्थिवत्वमेव, कथं तस्य जलत्वमिति चेन्न । ऊष्मणा विलीनस्य तस्यजलत्वस्य प्रत्यक्षसिद्धत्वात् ।

'यद् द्रव्यं यद्द्रव्वंसजन्यं तत्तदुपादानोपादेयमि'ति व्याप्त्या करकाद्युपादानोपादेये जलत्वस्य प्रत्यक्षतया जलोपादानोपादेये करकादावपि जलत्वं सिद्धयति ।

न च करकादौ पार्थिवत्वाभावे कथन्तत्र काठिन्यप्रतीतिरिति वाच्यम् । अदृष्टविशेषेणद्रवत्वप्रतिरोधात् करकादीनां काठिन्यं प्रत्ययस्य भ्रान्तित्वादिति दिक् ।

प्रश्नः ५२—सुवर्णस्य पार्थिवत्वं निरस्य तस्य तेजसत्वे प्रमाणं प्रदर्शयत ।

उत्तरम्—ननु सुवर्णं पार्थिवं नैमित्तिकद्रवत्ववत्वादित्यनुमानेन सुवर्णस्य पार्थिवत्मेवास्तु कथं तस्य तैजसत्वमिति चेन्न । सुवर्णं तैजसं असति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वात्, यन्नैवं तन्नैवं, तथा पृथिवीत्यनुमानेन सुवर्णस्य तैजसत्वसिद्धेः ।

न चात्र पीतरूपवद् द्रव्यात्मकस्य सुवर्णस्य बाधः तैजससुवर्णस्य पक्षत्वे अनुमानापूर्वं तेजससुवर्णस्याप्रसिद्धया पक्षाप्रसिद्धिः सुवर्णपदवाच्यस्य पक्षत्वे धर्मशास्त्रे पीतद्रव्येऽपि सुवर्णपदयोगाद् बाधतादवस्थ्यमिति वाच्यम् । असति प्रतिबोधकेऽत्यन्तानलसंयोगे सति अनुच्छिद्यमानद्रवत्वाधिकरणस्यैव पक्षतयाऽदोषात् । एवञ्च अनुमानप्रमाणेन सुवर्णस्य तैजसत्वं सिद्धमिति दिक् ।

प्रश्नः ५३—हेतुघटकपदोपादानफलमुपपादयता चक्षुषस्तैजसत्वं प्रसाध्य प्रभाया दृष्टान्तत्वपक्षे द्वितीयपरकीयपदप्रयोजनमभिधीयताम् ।

उत्तरम्—चक्षुषस्तैजसत्वम्—चक्षुस्तैजसं द्रव्यत्वे सति परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवदित्यनुमानेन चक्षुषस्तैजसत्वं सिद्धयति ।

हेतुघटकपदोपादानफलम्—प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादत्र दृष्टान्तेऽव्याप्तिवारणाय प्रथमपरकीयेति । घटादेः स्वीयरूपव्यञ्जकत्वाद्व्यभिचारवारणाय द्वितीयं परकीयेति । अथवा प्रभया दृष्टान्तत्वसम्भवादाद्यं परकीयेति

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पदं न देयम् । चक्षुः सन्निकर्षे व्यभिचारवारणाय 'द्रव्यत्वे सति' इति पदं देयम् । मनसि व्यभिचारवारणाय 'परकीय स्पर्शाद्यव्यञ्जकत्वे सति' इति द्वितीयं सत्यन्तम् 'वाय्वादौ व्यभिचारवारणाय विशेष्यदलम् इति दिक् ।

द्रश्नः ५४—पीतिमाश्रयस्यादुतत्वपक्षे द्रुतत्वकल्पे च सुवर्णस्य तैजसत्वं प्रसाध्य तत्साधकहेतुघटकपदव्यावृत्तिः का ? कथं नाप्रयोजकता ? किञ्चात्र-पक्षतावच्छेदकम् ? इति समीक्ष्यताम् ।

उत्तरम्—पीतिमाश्रयस्य-अद्रुतत्वपक्षे द्रुतत्वकल्पे चेदं सुवर्णतैजसं प्रतिबन्धकेऽसति, सत्यन्तानलसंयोगेऽपि सति, अनुच्छिद्यमाननैमित्तिकद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवं यथा पृथिवीत्यनुमानेन सुवर्णस्य तैजसत्वं सिद्ध्यति ।

सुवर्णस्य तैजसत्वसाधकहेतुघटकपदव्यावृत्तिः—तत्र हेतौ जलमध्यस्थघृतादौ व्यभिचारवारणाय 'असति प्रतिबन्धके' इति पदस्यनिवेशः । अनुच्छिद्यमानद्रवत्वादित्येतन्मात्रोक्तौ अग्नेरसमवधाने कथञ्चिदग्निसंयोगेवाऽनुच्छिद्यमानद्रवत्वस्य घृतादौ सत्वेन तत्र व्यभिचारवारणाय 'अत्यन्तानलसंयोगे सति इति निवेशः ।

ननु उच्छिद्यमानो द्रवीयस्य स उच्छिद्यमानद्रवः, न उच्छिद्यमानद्रवः इति अनुच्छिद्यमानद्रवः, तस्य भावस्तत्त्वमिति व्युत्पत्त्या 'उच्छिद्यमानद्रवत्वाधिकरणभिन्नत्वम्' इति हेतुर्लभ्यते । ततश्च गगने व्यभिचार इति चेन्न । न उच्छिद्यमानो द्रवो यस्य सोऽनुच्छिद्यमानद्रवः, तस्य भावस्तत्त्वमिति व्युत्पत्त्या 'अनुच्छिद्यमानद्रवत्वाधिकरणत्वं' हेतुर्लभ्यते । तादृशहेतोश्च गगनेऽसत्त्वेन व्यभिचाराऽसम्भवात् ।

न च अनुकूलतर्काभावात् पूर्वोहेतोः कथं नाप्रयोजकतेति वाच्यम् । पृथिवी द्रवत्वस्य जन्यजलद्रवत्वस्य च अत्यन्ताग्निसंयोगनाश्यतया, सुवर्णद्रवत्वस्य चातथात्वानुभवस्य चानुकूलतर्कस्य सत्वात् ।

ननु पीतिमाश्रयस्य पार्थिवभागस्यापि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेन्न । जलमध्यस्थमसीक्षोदवत्तस्याद्रुतत्वात् ।

अत्र पक्षतावच्छेदकम्—अत्र सुवर्णपदवाच्यत्वमेव पक्षतावच्छेदकमिति दिक् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रश्नः ५५—वायौ प्रत्यक्ष-प्रमाणं सम्भवति न वा ? सम्भवति चेत् कथम् ? न सम्भवति चेत् कथम् ? आद्ये तत्साधकानुमानावश्यकता च का ? स्पर्शशब्दधृतिकल्पैः लिङ्गैः वायोरनुमानप्रणाली च कीदृशी ?

उत्तरम्—ननु स्पार्शनप्रत्यक्षे स्पर्शस्य कारणतास्वीकारिनव्यमते वायोः प्रत्यक्षत्वेऽपि बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे उद्भूतरूपस्य कारणत्वाभ्युपगन्तु-प्राचीनमते वायोरप्रत्यक्षतया तत्र किं प्रामाणमिति चेदत्रोच्यते—विजातीय-स्पर्शेन विलक्षणशब्देन तृणादीनां धृत्याशाखादीनां कम्पेन च वायोरनुमान-सम्भवः । तथाहि—

योऽयं रूपवद् द्रव्यासमवेतः स्पर्शः स क्वचिदाश्रितः स्पर्शत्वात् पृथिवी-समवेतस्पर्शवत् ।

एवम् असति रूपवद् द्रव्याभिघाते योऽयं पर्णादिषु शब्दसन्तानः स स्पर्श-वद्वेगवद्द्रव्यसंयोगजन्य अविभज्यभावनावयवद्रव्यसम्बन्धिशब्दसन्तानत्वात् दण्डाभिहतभेरीशब्दसन्तानवत् । नभसितृणातूलविमानादीनां धृतिः स्पर्श-वद्वेगवद्द्रव्यसंयोगहेतुका, अस्मदाद्यनधिष्ठितद्रव्यधृतित्वात् नौकाधृतिवत्, रूपवद्द्रव्याभिघातमन्त्रेण तृणे कर्म-स्पर्शवद्वेगवद्द्रव्याभिघातजन्यं विजा-तीयकर्मत्वात्, नदीपूराहतकाशादिकर्मवदिति दिक् ।

प्रश्नः ५६—किन्नाम वायुत्वं ? तस्य भेदप्रभेदाश्च के ? वायुत्वजातौ किं प्रमाणम् ? त्वगिन्द्रियस्य वायवीयत्वं कथम् ? सर्वं दिनकरी रीत्या प्रतिपादयत ।

उत्तरम्—ननु 'मूले 'अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः' इत्युक्तम् । तेन अपाकजानुष्णाशीतस्पर्शवत्वं वायुत्वमिति वायोर्लक्षणं निष्पन्नम् । तच्च पटादावतिव्याप्तमिति चेन्न । पाकजस्पर्शवद्वृत्त्यनुष्णाशीतस्पर्शवद्वृत्ति-द्रव्यत्वसाक्षाद् व्याप्यजातिमत्त्वस्य तदर्थत्वेनादोषात् । ततश्च 'अपाकजानुष्णा-शीतस्पर्शवत्त्वं वायुत्वमिति फलितम् ।

वायोः भेदप्रभेदाः

स च वायुर्द्विविधः—नित्यः, अनित्यश्च । परमाणुरूपो नित्यः, कार्यरूपोऽ-नित्योऽवयवसमवेतश्च । कार्यरूपोऽपि त्रिविधः—शरीरेन्द्रियविषयभेदात् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तत्र शरीरम् अयोनिजं पिशाचादीनाम् । स्पर्शग्राहकम् इन्द्रियं त्वक् । प्राणादि-महावायुपर्यन्तो विषयः ।

वायुत्वजातौ प्रमाणम्—समवायसम्बन्धावच्छिन्नविजातीयस्पर्शत्वावच्छिन्न-कार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्ना कारणता किञ्चिद्धर्मावच्छिन्नाकारणतात्वादित्यनुमानेन वायुत्वं जातिः सिद्ध्यति ।

त्वगिन्द्रियस्य वायवीयत्वम्

शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक् वायवीयम्, रूपादिषु मध्ये स्पर्श-स्यैवाभिव्यञ्जकत्वात् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यञ्जनपवनवत् । इत्यनुमानेन त्वगिन्द्रियस्य वायवीयत्वं सिद्ध्यति इति दिक् ।

प्रश्नः ५७—विशेषणासिद्धि-विशेष्यासिद्धिनिराकरणपूर्वकाकाशसाधकानुमानं समुपपाद्यताम् ।

उत्तरम्—आकाश-साधकानुमानम्—

"आकाशस्य तु विज्ञेयः शब्दोवैशेषिको गुणः' इति मूलोक्तकारिका । तेन, समवायेन शब्दाश्रयत्वम् आकाशत्वमिति । शब्दो द्रव्यमितिमीमांसक-मतनिरासाय कारिकायां गुणपदनिवेशः ।

ननु आकाश एव नास्ति कश्चित्पदार्थः कथं तर्हि तल्लणप्रसंग इति चेन्न प्रत्यक्षप्रमाणासिद्धत्वेऽपि तस्यानुमानप्रमाणसिद्धत्वात् । तथाहि—गुणो हि भवति द्रव्यसमवेतः, शब्दोऽपि गुण एव । न शब्दः केवलं गुणः, अपितु विशेष-गुणः, अतस्तेनापि क्वचिद् द्रव्ये समवेतेन भाव्यम् । न च पृथिजलतेजोवाय-स्तदाश्रयाः सम्भवन्तीति वाच्यम् तस्याग्निसंयोगोऽसमवायिकारणकत्वाभावात्, अकारणगुणपूर्वकप्रत्यक्षत्वाच्च । नापि स दिक्कालमनसां गुणो भवितुमर्हति, विशेषगुणत्वात् नहि कोऽपि विशेषगुणः सन् दिक्कालमनस्सु वर्तते । न च शब्दः आत्मविशेषगुणः स्यादिति वाच्यम्, बहिरिंन्द्रियग्राह्यत्वेन तस्य आत्मविशेष-गुणत्वाभावात् । नहि कोऽपि आत्मविशेषगुणो बहिरिन्द्रियेण गृह्यते । शब्दश्च बहिरिन्द्रियग्राह्यो विशेषगुण इति सिद्ध्यति, नाऽऽत्मनो विशेषगुणः अतस्तदा-श्रयत्वेन आकाशात्मकं नवमं द्रव्यं कल्प्यम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इदञ्च आकाशसाधकानुमानम् = "शब्दः, पृथिव्याद्यष्ट द्रव्यातिरिक्तद्रव्याश्रितः अष्ट द्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात् यन्नैवं तन्नैवं यथा रूपादि" ।

विशेषणासिद्धिनिराकरणम्—

नचात्राकाशसाधकहेतौ विशेषणासिद्धिरितिवाच्यम्, शब्दो न स्पर्शवद्विशेषगुणः, अग्निसंयोगासमवायिकारणत्वाभावे सति अकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वात् सुखवत्, शब्दो न दिक्कालमनसां गुणो विशेषगुणत्वात् रूपवत्, शब्दो नात्मविशेषगुणो बहिरिन्द्रियग्राह्यत्वाद्रूपवदित्यनुमानत्रयेण शब्दे अष्टद्रव्यनाश्रितत्वसिद्धया विशेषणासिद्धयभावात् ।

ननु शब्दे द्रव्याश्रितत्वसिद्धयो आकाशसाधकहेतौ विशेष्यासिद्धिरिति चेन्न, शब्दो द्रव्यसमवेतः गुणत्वात् संयोगवदित्यनुमानेन द्रव्याश्रितत्वसिद्धौ विशेष्यासिद्धयभावात् इतिदिक् ।

प्रश्नः ५८—कालस्य सपदकृत्यं लक्षणं किम् ? तस्य सद्भावे किंमानम् ? कथं च कालस्यैकत्वे क्षणादिनादिव्यहारः । सर्वं दिनकरीरीत्या प्रतिपादयत ।

उत्तरम्—"जन्यानां जनकः कालो जगतामाश्रयो मतः ।" इत्युक्तं मूले विश्वनाथेन । तेन दिनकरीरीत्या -- कौलिकसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितमधिकरणतया निमित्तत्वमिति कालस्य लक्षणं फलितम् ।

पदकृत्यम्—कालिकसम्बन्धावच्छिन्नेतिकरणात् दिशि, अधिकरणतयेवेतिकरणादृष्टेश्वरयोर्ना 'तिव्याप्ति'रिति ।

कालसद्भावे मानम्

"जगतामाश्रयः कालः सर्ववानि" तिप्रतीत्या जगदाश्रयत्वेन कालः सिद्धयति ।

ननु "जगतामाश्रयः" इति प्रतीतिःदिग्विषयिन्येवास्तु, अतिरिक्तकालकल्पने मानाभावादिति चेन्न, "इदानीं घटः" इति प्रतीतिरूपप्रमाणान्तरेण काले सिद्धे प्रकृत-प्रतीतिबलात् कालस्य सर्वाधारत्वं कल्प्यते-इत्याशयात् ।

Sri Vidyabharathi Book Centre, Sringeri

न च 'इदानीं घटः' इति प्रतीतिः सूर्यपरिस्पन्दमेव विषयीकरोति, न

CC-O. In Public Domain. Digitized by eGangotri

कालमिति वाच्यम्, तावतापि सूर्यपरिस्पन्दस्य घटादिना सम्बन्धो वाच्यः, स च संयोगो न सम्भवति 'द्रव्ययोरेव संयोगः' इति नियमात्। नापि समवायः, अन्यनिष्ठक्रियायाः अन्यत्र समवायासम्भात्।

अपि तु स्वाश्रयतपनसंयोग एव। एवं च स्वं=सूर्यक्रिया तदाश्रयः तपनः=सूर्यः तत्संयोगी कालः यत्संयोगो घटे इति सम्बन्धघटकतया कालः सिद्ध्यतीत्याशयात्।

न च सम्बन्धघटकयोगिपदेनाकाशमेव गृह्यतां, तथा च नातिरिक्तः कालः सिद्ध्यतीति वाच्यम्। आकाशदिगात्मनां विनिगमनाविरहेणातिरिक्तैक-कालस्यैव संगिपदेन ग्रहणात्। इत्थञ्चातिरिक्तकालसिद्धौ कालस्य सर्वाश्रय-त्वमपि सिद्धम्।

कालस्यैकत्वे क्षणादिनादिव्यवहारः

ननु यदि काल एक एव तदा कथं क्षण-दिनमासादीनां व्यवहार इति चेन्न। "परापरत्वधीहेतुः क्षणादित्वादुपाधितः" इति मूलोक्त्या कालस्यै-कत्वेऽपि उपाधिभेदात् क्षण-दिन-मासादीनां व्यवहारविषयत्वात्। तथा चैक-स्यैव कालस्य किञ्चिद्धर्मविशिष्टस्य क्षणत्वं, किञ्चिद्धर्म विशिष्टस्य दिनत्वं, किञ्चिद्धर्मविशिष्टस्य मासत्वं नतु केवलस्येतिदिक्।

प्रश्नः ५९—"महाप्रलये क्षणादिव्यवहारो यद्यस्ति तदाऽनायत्या ध्वंसे-नोपपादनीयः" इति विश्वनाथः। अत्र महाप्रलयः कः? तत्र क्षणव्यवहारस्य किं प्रयोजनम्? यदि पदेन किं सूचितम्? महाप्रलयवच्च सृष्टिकालेऽपि ध्वंसेनैव कथं न क्षणादिव्यवहारः? सर्वं दिनकरीरीत्या प्रतिपादयत।

उत्तरम्—जन्यभावानधिकरणः कालो महाप्रलयः। तत्र महाप्रलये क्षणादि-व्यवहार आवश्यकः, तदभावे महाप्रलयाधिकरणक्षणाप्रसिद्धेः महाप्रलयोत्पत्तौ क्षणघटितस्य उत्पत्तिलक्षणस्य तदधिकरणक्षणावृत्तित्वव्याप्य-स्ववृत्तिध्वंसप्रति-योगिताकसमयवृत्तिरूपस्याव्याप्ति-प्रसंगात्।

यदिपदेन किं सूचितम्—"क्षणाघटितस्यैव स्ववृत्तिध्वंसप्रतियोगिकाला-वृत्तित्वविशिष्ट-स्ववृत्तित्वविशिष्ट-स्ववृत्तिरूपस्योत्पत्तिलक्षणत्वे नास्ति तत्र क्षणादीनां व्यवहारस्यावश्यकता" इत्येव यदि पदेन सूचितम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सृष्टिकालेऽपि ध्वंसेनैव कथं न क्षणादिव्यवहारः

ध्वंस-पदलक्षितस्ववृत्ति ध्वंसप्रतियोगि प्रतियोगिकयावद् ध्वंसविशिष्ट-समतस्यैव सहाप्रलये क्षणव्यवहारविषयत्वेन महाप्रलयवच्च सृष्टिकालेऽपि न क्षणादिव्यवहारः सम्भवतीति दिक्।

प्रश्न ६०—आत्मत्वजातिसाधनप्रणाली कीदृशी ? सा जातिः जीवेशसाधारणी न वा ? आद्ये परमेश्वरेऽपि कर्थं न सुखाद्युत्पत्तिः ? द्वितीये च परमात्मनो दशमद्रव्यत्वापत्तिः कुतो न ?

उत्तरम्—आत्मत्वजातिसाधनप्रणाली—स्वात्मनि स्वरूपत आत्मत्वस्य मानसप्रत्यक्षविषयत्वेऽपि अन्यात्मनोऽप्रत्यक्षत्वेन सकलात्मसाधारणानुगत-प्रत्यक्षासम्भव इति अनेकसमवेतत्वघटितजातित्वग्रहेऽनेकव्यक्तिग्रहहेतुतायाः सर्वसिद्धत्वादात्मत्वस्य स्वरूपतो ग्रहेऽपि तद्गतजातित्वस्य अप्रत्यक्षतया आत्मत्वस्य जातित्वेऽनुमानमेव प्रमाणम्। तथाहि—समवायेन सुखं प्रति तादात्म्येन आत्माकारणमिति कार्यकारणभावस्वीकारात् समवायसम्बन्धावच्छिन्न-सुखत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्ना कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानेनात्मत्वात्मधर्मसिद्धौ आत्मत्वं जातिः, अनुवृत्तप्रत्ययहेतुत्वे सति जातित्वबाधकरहितत्वादित्यनुमानेन आत्मत्वं जातिः सिद्ध्यति।

आत्मत्वजातिः जीवेशसाधारणी न वा ?

प्राचां मते सा आत्मत्वजातिः जीवेशसाधारणी। न चैवमीश्वरेऽपि सुखोत्पादापत्तिरिति वाच्यम्, अदुष्टादिरूपकारणाभावेन ईश्वरे सुखोत्पादाभाव-प्रसंगात्।

नव्यमते तु ईश्वरे आत्मत्वजातिर्नास्ति प्रमाणाभावात्।

परमात्मनो दशमद्रव्यत्वापत्तिः कुतो न—न चैवमीश्वरस्याऽनात्मत्वे तस्य दशमद्रव्यत्वापत्तिः कुतो नेति वाच्यम्, ज्ञानवत्त्वमात्मत्वमिति लक्षणं कृत्वा परमात्मनोऽपि ज्ञानवत्त्वेनात्मत्वात् नव द्रव्याणीति विभागस्य समुचित-त्वादिति दिक्।

प्रश्नः ६१—चेतनस्वरूपात्मनो जीवात्मनः किमात्मत्वं ? कथं तस्य शरीरेन्द्रियातिरिक्तता ? कथञ्च तस्य नित्यता ?

Sri Vidyabhathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

उत्तरम्—चेतनरूपात्मसद्भावे मानम्—आत्मा हि जनकतासम्बन्धेन इन्द्रियाणाम्, अवच्छेदकतासम्बन्धेन शरीरस्य च चैतन्यसम्पादकः। यद्यचेतनं यत्करोति – यदुपधायकं भवति तत्तदुपधाने चेतनाधिष्ठितं भवतीति व्याप्त्या शरीरेन्द्रियाणि चेतनाधिष्ठितानि, अचेतनत्वे सति जनकतावच्छेदकताऽन्यतरसम्बन्धेन ज्ञानवत्त्वाद् वास्यादिवदित्यनुमानमेव चेतनरूपात्मसद्भावे मानम्।

चेतनरूपान्मनः शरीरेन्द्रियाद्यतिरिक्तता--

ननु शरीरमेवात्मा, तस्यैवधर्मः चैतन्यम्। स एव कर्ता न कश्चिद्देहातिरिक्त आत्मेति चेन्न, मृतशरीरेषु व्यभिचारदर्शनात्। न च नैयायिकमते मुक्तात्मनि प्राणविशिष्टात्मविरहात् ज्ञानरूपचैतन्यासत्वमिव चार्वाकमते मृतशरीरे प्राणाभावात् चैतन्यासत्वमित्यभ्युपगमेन दोषाभावात् प्रत्यक्षसिद्धशरीरमेव चेतनरूपात्मेति चेन्न उपचयापचयैरुत्पादविशिवतः शरीरस्य चैतन्ये अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावात् वाल्ये बिलोकितस्य स्थविरे स्मरणानुपपत्तेः प्रवृत्तिकारणेष्टसाधनतास्मरणाभावात् बालकस्य स्तन्यपाने प्रभृत्यनुपपत्तेश्च। नापि चक्षुरादीनामेव चेतनरूपात्मता, तथा सति निरुक्तकार्यकारणभावात् प्राक् चक्षुषा ज्ञातानां पश्चात् चक्षुषोऽभावे स्मरणानुपपत्तेः। न च मनसः तादृशात्मतेति वाच्यम्, तथा सति मानसः प्रत्यक्षकारणमहत्त्वाभावात् मनसि ज्ञानादिसत्त्वे तत्प्रत्यक्षाऽनुपपत्तेः। इत्थञ्च चेतनरूपात्मनः शरीरेन्द्रियाद्यतिरिक्तता सिद्धा।

कथं चेतनरूपात्मनो नित्यता--

एवं च संसारस्याऽनादित्वेन जीवनादृष्टोद्बुद्धसंस्कारजन्यजन्मान्तरानुभूतेदृशसाधनत्वस्मरणाद् बालस्य स्तन्यपानप्रवृत्तिदर्शनात् वानरशिशूनां गर्भनिःसृतमात्राणां शाखाबलम्बने प्रवृत्तदर्शनाच्च आत्मनोऽनादित्वसिद्धौ अनादिभावस्य च नाशासम्भवात् आत्मनो नित्यता सिद्धयतीति दिक्।

प्रश्नः ६२—क्षणिकविज्ञानवादिबोद्धानां मतमुपन्यस्य निराक्रियताम्।

उत्तरम्—क्षणिकविज्ञानवादिबौद्धमते विज्ञानमेवात्मा, तच्च स्वतः प्रकाशम्, अतएव चेतनम् ज्ञानसुखादिकञ्च तस्यैवाकारविशेषः। यत् सत् तत्

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

क्षणिकमिति नियमेन तद्विज्ञानमपि सत्त्वात्। अतः क्षणिकविज्ञानमिदं द्विविधम्—

प्रवृत्तिविज्ञानम्, आलयविज्ञानञ्च। तत्र 'अयं घटः' इति प्रवृत्तिविज्ञानम् 'अयमहम्' इत्याकारकम् आलयविज्ञानम्। पूर्वपूर्वविज्ञानमुत्तरविज्ञानस्य जनकम्' इति नियमेन सुषुप्तौ प्रवृत्तिविज्ञानाभावेऽपि आलयविज्ञानधारायाः अस्तित्वे न व्यभिचारः। क्षणिकत्वेऽपि पूर्व-पूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने मृगमदवासनावासितवसने इव संक्रमणं भवतीति नानुपपत्तिः स्मरणादेरिति चेन्न, विज्ञानस्यात्मत्वासम्भात्। तथाहि—

विज्ञानमात्रमेति वदतश्चार्वाकस्यमतेक्षणिकविज्ञानं जगद् विषयकं, यत् किञ्चिद्विषयकं निर्विषयकं वा विज्ञानमात्रमेत्यभिमतम्। तत्र न जगद् विषयकम्, आत्मनां सर्वज्ञत्वापत्तेः। यत् किञ्चिद् विषयकमपि न, विनिगमनाविरहेण किं विषयकं विज्ञानमात्मा, किं विषयकं नेत्यनिर्णयापत्तौ सुषुप्तावपि विषयावभासप्रसंगात्।

न च निर्विषयकम्, निर्विषयकस्य ज्ञानत्वे मानाभावात्। नापि कालान्तरे स्मरणोपपत्तिः, मात्रानुभूतस्य गर्भस्थतनयेन स्मरणापत्त्यापूर्वविज्ञानसंस्कारस्योत्तरविज्ञाने संक्रमणासम्भवात्।

न च उपादानोपादेयभावस्य नियामकत्वेन उत्तरविज्ञानानामेव वासनोत्पादरूपसंक्रमणजनकत्वेन च व्यवस्था, संस्कारानन्त्यप्रसंगादिति दिक्।

प्रश्नः ६३—नित्यविज्ञानस्यात्मवादिनां वेदान्तिनां मतमुपपाद्य निराक्रियताम्?

उत्तरम्—ननु क्षणिकविज्ञानस्यात्मत्वे वासनासंक्रमासम्भवेन स्मरणानुपपत्तिरतोनित्यविज्ञानमेवात्मास्तु। न च ज्ञानस्य नित्यत्वे मानाभाव इति वाच्यम् 'अविनाशी वा अरेऽयमात्मा सत्यं ज्ञानमनन्तं 'ब्रह्म' इति श्रुतेरेव मानत्वादिति चेन्न, विज्ञानस्यात्मत्वासम्भवात्। तथाहि, जगद्विषयकं यत् किञ्चित् विषयकं निर्विषयकं वा विज्ञानमात्मा? नाद्यः, जीवात्मनां सर्वज्ञत्वापत्तेः। न यत् किञ्चित् विषयकम्, विनिगमकाभावप्रसंगात्। न निर्विषयकं विज्ञानमात्मा, निर्विषयकस्य ज्ञानत्वे मानाभावप्रसंगात् आत्मनां ज्ञानरूपत्वे

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सविषयकत्वेनानुभवापात्तेश्च । तस्माज्ज्ञानादिभिन्नो नित्य आत्मेति सिद्धम् ।

न च "सत्यं ज्ञानमनन्तं ब्रह्म, नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतिभिर्ज्ञानरूपता आत्मन आस्थीयते इति वाच्यम् 'यः सर्वज्ञः स सर्ववित्' 'आनन्दं ब्रह्मणो विद्वान्' इत्यादि श्रुत्यनुरोधेन 'नित्यं विज्ञानमानन्दम्' इत्यादि श्रुतौ ज्ञानादिपदानामर्श आद्यजन्तत्वाङ्गीकारेण आत्मनोज्ञानसुखाद्याश्रयत्वस्य सिद्धावपि ज्ञानसुखादिरूपत्वासिद्धेरितिदिक् ।

प्रश्नः ६४—प्रकृतेः कर्तृत्वं पुरुषस्य च चैतन्यमिति सांख्यकृन्मतमुपपाद्य सयुक्तिकं खण्डयताम् ?

उत्तरम्—

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ।।

इति पंचविंशतितत्त्वाभ्युपगन्तृ-सांख्यकृन्मते = प्रकृतेर्गुणैः सत्वरजस्तमोरूपैः क्रियमाणानि कर्माणि भवन्ति, अहंकारोऽहं प्रत्ययस्तेन मूढः आत्मा-अन्तःकरणं तस्य स पुरुषः कर्ताहमिति मन्यते । इत्यर्थकेन 'प्रकृतेः क्रियामाणानि गुणैः कर्माणि सर्वशः । अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ।' इति गीतावचनेन प्रकृतेरेव कर्तृत्वं प्रतीयते, न पुरुषस्य, किन्तु पुरुषस्तु पुष्करपालाशवन्निर्लेपः सः 'असंगो ह्ययं पुरुषः' इति श्रुत्या तस्याकारणत्वावगमेन 'पुरुषः कर्तृत्वाभाववान्, कारणत्वाभावात्' इत्यनुमानेन च पुरुषेऽकर्तृत्वं सिद्धेः ।

समीचीनमेतत् अन्यथा पुरुषस्य कारणत्वाभ्युपगमे कार्यकारणयोः सांख्यमतेऽभेदात् कार्यनाशेः तन्नाशः स्यात् ।

न च एतादृशपुरुषस्यानङ्गीकार एव वरम् प्रयोजनाभावादिति वाच्यम्, क्वचित्प्रसिद्धस्यैव चैतन्यस्य बुद्धिगतचैतन्याभिमानापत्तये तत्कल्पनात् बुद्धिरेव महत्त्वमिति सांख्यैरुच्यते ।

न च पुरुषस्याकर्तृत्वे तत्र धर्माधर्मयोरुत्पादानसम्भवेन तदधीनसुखदुःखयोरपि तत्रानुपादात्दुःखध्वंसरूपो मोक्षः पुरुषस्य न स्यादिति मोक्षार्थं प्रकृतिपुरुषविवेकस्यापि नोपेक्षेति तदर्थं क्रियमाणं सांख्यशास्त्रमप्यनर्थकं स्यादिति वाच्यम्, बुद्धिसत्वे इन्द्रियद्वारा बुद्धिपरिणामेन घट इत्यादिज्ञानसम्बद्धो घटादिविषयः घटाद्याकारज्ञानपरिणामिबुद्ध्या सान्निध्यरूपदोषेण अगृहीतभेदवत्त्वसम्बन्धेन पुरुषनिष्ठपुरुषस्वरूपतिरोधायकः, पुरुषस्य संसारापादकबुद्धिनाशे

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri
तु तत्परिणामस्य ज्ञानस्याभावेन विषयावच्छेदकाभावात् कैवल्यावस्थानरूपो मोक्षः दुःखसम्बन्धतद्ध्वंसरूपौ संसारमोक्षौ बुद्धेरेव, न पुंसः, भेदाग्रहादेव अहं बद्धो मुक्तो वेत्यभिमन्यते इति प्रकृतिपुरुषविवेकार्थं शास्त्रस्य सार्थक्यात् ।

एवञ्च धार्मिकोऽहं करोमि—इत्यादिप्रतीत्या कृतिसामानाधिकरण्येन प्रतीयमाना धर्मादयो बुद्धेरेवेति चेन्न । चेतनोऽहं करोमीति प्रतीत्या ज्ञानसामानाधिकरण्येन प्रतीयमानकृते पुरुषनिष्ठत्वौचित्येन कृतिसामानाधिकरण्येन प्रतीयमानधर्मादीनामपि पुरुषनिष्ठत्वौचित्यात् ।

न च उक्तगीतावचनात् बुद्धेः कर्तृत्वसिद्धौ चेतनोऽहं करोमीति प्रतीतिः चैतन्यांशे भ्रमो बुद्धेरचेतनप्रकृतिपरिणामित्वेनाचेतनत्वादिति वाच्यम्, 'प्रकृतेः क्रियमाणानि' इत्यस्य प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैरिच्छादिभिः कर्ताऽहमेवेत्यस्य तदर्थतया आत्मनः स्वतन्त्रकर्तृत्वनिरासे तात्पर्यात् । तदुक्तं 'तत्रैवं सति कर्तारमात्मानं केवलं तु यः' इत्यादिना भगवतेति दिक् ।

प्रश्नः ६५—"प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः ?" इति विश्वनाथः ? अत्र प्रवृत्तिपदार्थः कः ? अनुमानप्रणाली च कीदृशी ?

उत्तरम्—अत्र प्रवृत्तिपदार्थश्चेष्टा, ज्ञानेच्छायत्नातीनां देहेऽभावात् । सा च चेष्टा इष्टानिष्टप्राप्तिपरिहारानुकूलव्यापाररूपा । तथा च परदेहः आत्मवान् चेष्टावत्त्वाद् रथवदित्यनुमानेन परदेहदावात्मानुमीयते । न च इष्टानिष्टप्राप्तिपरिहारानुकूलव्यापाररूपायाश्चेष्टाया रथेऽसत्त्वात् दृष्टान्तासिद्धिरिति वाच्यम्, चेष्टापदेन उत्तरदेशसंयोगप्राप्तियोग्यक्रियया इव विवक्षणेनादोषात् तस्याश्च रथे सत्त्वेन दृष्टान्तासिद्ध्यभावात् । न चैवमपि जले व्यभिचारः, चेष्टापदेन चेतनप्रयुक्तक्रियाया एत विवक्षणेनादोषात् । तस्याश्च, रथे सत्त्वेन जले चासत्त्वेन दृष्टान्तासिद्धिव्यभिचारयोरभावात् । इति दिक् ।

प्रश्नः ६६—परदेहे कथमात्मानुमेयः ? स्वदेहे चायमात्मा कथं प्रत्यक्षगोचरः ? अत्र दृष्टान्तासिद्धिवारणं कथम् ? सर्वं दिनकरीरीत्या प्रतिपादयत ?

उत्तरम्—ननु परदेहे कथमात्मानुमेय इति चेन्न, परदेह आत्मवान्, चेष्टावान्, चेष्टावत्त्वात्, रथवत्—इत्यनुमानेन—परदेहादावात्मासिद्धेः । नचेष्टानिष्टप्राप्तिपरिहारानुकूलव्यापाररूपायाश्चेष्टाया रथेऽसत्त्वात् दृष्टान्तासिद्धिरिति

Sri Vijayabhuvana Book Centre, Tiruchirappalli

CC-O. In Public Domain. Digitized by eGangotri
वाच्यम्, चेष्टापदेनोत्तरसंयोगप्राप्तियोग्यक्रियाया इव विवक्षणेनादोषादिति। स्वदेशे चायमात्मा चेष्टया प्रत्यक्षगोचर इति दिक्।

प्रश्नः ६७—बुद्धिः कतिविधा ? अनुभूतिश्च कतिविधा ? कानि च तस्याः करणानि ? प्रत्यक्षलक्षणं च सोदाहरणं सभेदं प्रदर्शयत ?

उत्तरम्—बुद्धिर्द्विविधा—अनुभूतिःस्मृतिश्चेति। तत्रानुभूतिश्चतुर्विध—प्रत्यक्षम्, अनुमितिः, उपमितिः शब्दश्च। इयमेव चतुर्विधा 'प्रभा' कथ्यते।

एतासां चतसृणां करणानि चत्वारि

प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दश्चेति तथा चोक्तं न्यायसूत्रे प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति।

प्रत्यक्षलक्षणम्—'इन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यतात्वे सति ज्ञानत्वं प्रत्यक्षस्य लक्षणम्।' यथा—अयं घट, अयं पट इत्यादि।

न च सर्वस्यापि ज्ञानस्य मनोरूपेन्द्रियजन्यत्वात् अनुमित्यादावतिव्याप्तिरिति वाच्यम्, अनुमित्यादौ च नेन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यता अपि तु व्याप्तिज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यतेति विवक्षणेनादोषात्।

तद्भेदा—प्रत्यक्षं षड्विधम्—घ्राणजम्, रासनम्, चाक्षुषम्, स्पार्शनम्, श्रोत्रम्, मानसञ्चेति। तत्र घ्राणजम्—गन्ध-गन्धत्वभावादीनाम्। रासनम्—रस—रसत्वरसाभावादीनाम्।

चाक्षुषम्—उद्भूतरूप, तद्वद्द्रव्य-पृथक्त्व-संख्याविभागादीनाम्। स्पार्शनम्—स्पर्श-स्पर्शत्व-स्पर्शाभावादीनाम्। श्रौत्रम्—शब्द-शब्दत्व-शब्दाभावादीनामिति। मानसम्—आत्म-सुख-दुःखेच्छा-द्वेषादीनामिति दिक्।

प्रश्नः ६८—'त्वचो योगो मनसाज्ञानकारणम्' इति कारिकांशो व्याख्यायताम्।

अथवा

ज्ञानसामान्ये किं कारणम् ? सप्रमाणं प्रतिपाद्यत।

उत्तरम्—त्वङ्मनः संयोगो ज्ञानसामान्ये कारणमिति व्याख्या। तत्र **प्रमाणं यथा**—सुषुप्तिकाले त्वचं त्यक्त्वा यदा मनः पुरीतति नाड्यां

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रविशति तदा न जायते किमपि ज्ञानम् । अतः कल्प्यते त्वङ्मनः संयोग एव ज्ञानसामान्ये कारणम् ।

ननु स्पार्शनसामग्र्या एव चाक्षुषादिप्रतिबन्धकत्वं कुतो न कल्प्यते इति चेन्न, तथा सति सर्वत्र स्पार्शनसामग्र्याः सत्त्वेन चाक्षुषप्रत्यक्षस्योच्छेदः स्यादित्याशयात् ।

प्रश्नः ६९—प्रत्यक्षलक्षणमनुमितिलक्षणस्येश्वरप्रत्यक्षेऽव्याप्तिरिति व्याप्तिश्चानुमित्यादौ न प्रसज्येत, नापद्येत चानुमितिलक्षणस्य प्रत्यक्षेऽतिव्याप्तिः ।

उत्तरम्—"इन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यतावत्त्वे सति ज्ञानत्वं प्रत्यक्षस्य लक्षणम् । तेन अनुमित्यादौ च नेन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यता, अपितु व्याप्तिज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यतेति नातिव्याप्तिप्रसंगः । न चेश्वरप्रत्यक्षस्य नित्यतया इदं लक्षणं तत्राव्याप्तमिति वाच्यम्, इन्द्रियार्थसन्निकर्षोत्पन्नमित्यादिसूत्रेण ईश्वरप्रत्यक्षस्य अलक्ष्यतासूचनात् ।

अनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य, स्मृतौ अनुभवस्य कारणत्वात्तत्र तत्र नातिव्याप्तिः ।

अनुमितलक्षणम्—परामर्शजन्यं हेत्वविषयकं यज्ज्ञानं तद्वृत्त्यनुभवत्वव्याप्यजातिमत्त्वमिति अनुमितेर्लक्षणम् । तथा च परामर्शप्रत्यक्षस्य परामर्शजन्यत्वेऽपि हेत्वविषयकत्वात्तत्र नातिव्याप्तिः । वस्तुतः यत् किञ्चित् प्रत्यक्षमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वम्, एवं यां काञ्चिदनुमितिमादाय तद् व्यक्तिवृत्तिप्रत्यक्षावृत्तिजातिमत्त्वमनुमितित्वमितिदिक् ।

प्रश्नः ७०—बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति प्राच्यनव्यमतेन विविच्यताम् ।

उत्तरम्—चाक्षुषप्रत्यक्षे रूपस्य त्वाचप्रत्यक्षे स्पर्शस्य कारणत्वे गौरवमितिलाघवात् बहिरिन्द्रियजन्यप्रत्यक्षमात्रे द्रव्यं कारणम् । न चैवं वायोस्त्वाच —प्रत्यक्षं न स्यादिति वाच्यम्, इष्टापत्तेः । न च बहिरिन्द्रियजन्य-

CC-O. In Public Domain. Digitized by eGangotri

द्रव्यप्रत्यक्षे स्पर्शस्यैव कारणताऽस्त्विति वाच्यम्, तथा सति प्रभायाश्चाक्षुषप्रत्यक्षानापत्तेरिति प्राच्याः ।

नव्यास्तु प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्ययस्यापि सद्भावात् वायु-प्रभयोः प्रत्यक्षं भवत्येवेति बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे आत्मावृत्तिशब्दभिन्नविशेषगुणः कारणम्, न रूपम्, तथा चान्वयव्यतिरेकाभ्यां चाक्षुषप्रत्यक्षे रूपम् त्वाच प्रत्यक्षे स्पर्शः कारणम् । न च वायोः प्रत्यक्षे तद्गतसंख्याया अपि प्रत्यक्षं स्यादिति वाच्यम्, प्रभागतैकत्वादेरिव--वायुगतैकत्वादेरपि प्रत्यक्षस्येष्टत्वात् क्वचित्सजातीयसंवलनरूपदोषान्न संख्यादीनां ग्रहणमिति नव्याः । इतिदिक् ।

प्रश्नः ७१--जन्यज्ञानसामान्ये किं कारणमिति सोपपत्तिकमुपपाद्यताम् ।

उत्तरम्--त्वङ्मनः संयोगस्य ज्ञानजनकत्वात्, सुषुप्तिकाले मनः त्वचंऽङे विहाय--पुरीतति नाड्यां प्रविशति-इति तदभावेन ज्ञानानुत्पादाच्च त्व मनः संयोगो--जन्यज्ञानसामान्ये कारणम् ।

ननु सुषुप्तिसमये -चक्षुरादिमनः संयोगाभावादेव चाक्षुषादिप्रत्यक्षं भवति, ज्ञानाद्यभावादेव मानसं प्रत्यक्षम्, व्याप्तिज्ञानाभावादेवानुमितिः, एवं च सादृश्यज्ञानाभावादेवोपमितिः, पदज्ञानाभावादेव शाब्दबोधः, उद्बोधकाभावादेव स्मृतिश्च न सम्भवतीति क्षत्यभावात् जन्यज्ञानमात्रे तस्याहेतुत्वमेवास्त्विति चेन्न । तथा सति सुषुप्तिप्राक्कालोत्पन्नज्ञानस्य तत्सम्बन्धेनात्मनश्च प्रत्यक्षत्वापत्तेः । न चैवमपि चाक्षुषादि प्रत्यक्षकाले विषयत्वक्संयोग—त्वङ्मनःसंयोगयोः सत्त्वेन त्वाचप्रत्यक्षापत्तिः, परस्परं प्रतिबन्धात् किमपि ज्ञानं नोपपद्येत वेति वाच्यम्, चाक्षुषादिप्रत्यक्षसामग्र्याः त्वाचप्रत्यक्षं प्रति प्रतिबन्धकत्वकल्पनात् । मतान्तरेण चर्ममनः संयोगस्यैव जन्यज्ञानमात्रे कारणत्वकल्पनेन नोक्तदोष इति बोध्यम् इतिदिक् ।

प्रश्नः ७२—निर्विकल्पकज्ञानस्यावश्यकता का ? कथं तस्यातीन्द्रियत्वम् ? किं तस्य लक्षणम् ? कस्तस्याकारः ? कथञ्च तस्य निर्विषयता ?

उत्तरम्--ननु प्रकारताख्या-विशेष्यताख्या संसर्गताख्या चेति त्रिविधा विषयता, तत्र निर्विकल्पकस्य त्रिविधविषयताशून्यत्वसत्त्वेन निर्विषयत्वमेव

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्यादिति चेन्न, तुरीयविषयताया एव तत्राभ्युपगमेनादोषात्। निर्विकल्पकत्वञ्च प्रकारताशून्यत्वे सति ज्ञानत्वं, संसर्गताशून्यत्वे सति ज्ञानत्वं विशेष्यशून्यत्वे सति ज्ञानत्वं वा। एवमत्र तस्य घटघटत्वे इत्याकारः।

निर्विकल्पज्ञानस्यातीन्द्रियत्वम्—न च निर्विकल्पकानुव्यवसायोऽस्तु तथा च निर्विकल्पज्ञानस्य नातीन्द्रियत्वमिति वाच्यम्, रक्तः पटो, घटो द्रव्यम् इति समूहालम्बनानन्तरं रक्तघटज्ञानवानहमित्यनुव्यवसायवारणाय विशिष्टवैशिष्ट्यावगाहिविषयाशून्यज्ञानस्य अनुव्यवसायानङ्गीकारेण निर्विकल्पकज्ञानानुव्यवसायाभावेनादोषात्। तेन निर्विकल्पकज्ञानस्यातीन्द्रियत्वं सिद्धम्।

नचैवमपि 'घटघटत्वे' इति निर्विकल्पकानन्तरं घटत्वविशिष्टघटविषयकज्ञानवानहमित्यनुव्यवसायो मास्तु घटत्ववैशिष्ट्यस्य घटे निर्विकल्पकेनाविषयीकरणात्, किन्तु घटत्वज्ञानवानहमित्यनुव्यवसायोऽस्तु जात्यखण्डोपाध्यतिरिक्तस्य यत् किञ्चिद्धर्मप्रकारकत्वं नियमात् घटत्वस्य स्वरूपतो विषयितासम्बन्धेन ज्ञाने प्रकारकत्वसम्भवादिति वाच्यम्। जातेः समवायेनैव स्वरूपतः प्रकारत्वम्, नतु विषयित्वादिनापीत्यदोषात्। अन्यथाकालो घटः, ज्ञानं घट इति प्रतीतिः प्रमा स्यात् कालिकेन काले विषयितया च ज्ञाने स्वरूपतो घटत्वस्य प्रकारत्वात्।

प्रश्नः ७३—षड्विध-प्रत्यक्षे महत्त्वस्य हेतुत्वं विवियताम।

उत्तरम्—महत्त्व = महत्परिमाणं तत्तत्सम्बन्धभेदादुपपद्यते। तथाहि—द्रव्यप्रत्यक्षे महत्त्वं, समवायसम्बन्धेन कारणम्। द्रव्यसवेतानां गुण-कर्म-सामान्यानां प्रत्यक्षे महत्त्वं स्वाश्रयसमवायसम्बन्धेन कारणम्। अत्र स्वं = तदाश्रयः—द्रव्यं तत्र समवायो गुणकर्मसामान्यानामिति। द्रव्यसमवेतसमवेतानां गुणत्व-कर्मत्वादीनां प्रत्यक्षे महत्त्वं स्वाश्रयसमवेत-समवाय-सम्बन्धेन कारणम्। अत्र स्वम् = महत्त्वं तदाश्रयः द्रव्यं तत्र समवेता गुणकर्मादयः तत्र समवायो गुणत्व-कर्मत्वादीनामिति। एवमन्यत्रापि तत्तत्सम्बन्धेन महत्त्वस्य हैतुत्वं कल्पनीयमिति। तदुक्तं 'महत्त्वं षड्विधे हेतुरि'ति दिक्।

प्रश्नः ७४—इन्द्रियत्वं कथन्न जाति? किं न तस्य सूपदकृत्यं लक्षणम्?

Sri Vidyabharathi Book Centre, Sringeri

उत्तरम्—पृथिवीत्वाभाववति जलीये रसनेन्द्रिये इन्द्रियत्वम् इन्द्रियत्वा-

CC-O. In Public Domain. Digitized by eGangotri

भाववति घटादौ पृथिवीत्वम् घ्राणेन्द्रिये पृथिवीत्वेन्द्रियत्वयोः समावेशेन सांकर्यात् इन्द्रियत्वं न जातिः। तथा च 'शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनः संयोगाश्रयत्वम्—इन्द्रित्वमि'ति इन्द्रियस्य लक्षणम्।

पदकृत्यम्—आत्मादावतिव्याप्तिवारणाय सत्यन्तम् तत्रोद्भूतविशेषगुणाश्रयश्रोत्रेऽव्याप्तिवारणाय शब्देतरेति। विशेषगुणस्य रूपादेः चक्षूरादावि सत्त्वात्तत्राव्याप्तिवारणाय उद्भूतेति। तादृश—संयोगादिमच्चक्षुरादावव्याप्तिवारणाय विशेषेति। कालादावतिव्याप्तिवारणाय विशेष्यदलम्। तत्र प्राचीनमते प्रत्यक्षजनकत्वादिन्द्रियावयवे, नवीनमते कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतचक्षुः—संयोगाश्रये कालादावतिव्याप्तिवारणाय मनः पदम्। पुनः कालादावतिव्याप्तिवारणाय ज्ञानकारणमिति दिक्।

प्रश्नः ७५—पृथिवीपरमाणौ पृथिवीत्वस्य. वायौ सत्तायाश्च चाक्षुषप्रत्यक्षापत्तिः कथम् ? कथञ्च तत्परिहारः ? समवायस्य वैशेषिकमते कथमप्रत्यक्षता ? कथञ्च नैयायिकमते प्रत्यक्षता ?

उत्तरम्—ननु स्वाश्रयसमवेत–समवेतत्वसम्बन्धेन उद्भूतरूपसम्बन्धस्य महत्त्व सम्बन्धस्य च. सत्वात् पृथिवी=परमाणौ पृथिवीत्वस्य वायौ सत्तायाश्च चाक्षुषप्रत्यक्षापत्तिः कुतो नेति चेन्न, महत्त्वावच्छिन्नालोकसंयोगावच्छिन्नोद्भूतरूपावच्छिन्नचक्षुः संयोगाश्रयसमवायस्य द्रव्यसमवेतचाक्षुषं प्रति कारणताऽभ्युपगमेन पृथिवीपरमाणौ महत्त्वाभावत् वायौ उद्भूतरूपाभावाच्च तादृशपृथिवीत्वस्य तादृशसत्तायाश्च चाक्षुषप्रत्यक्षाभावसम्भवात्।

समवायस्य वैशेषिकमते अप्रत्यक्षताकथम्

वैशेषिकमते घटाकाशसंयोगस्य प्रत्यक्षवारणाय सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वेन यावतामेकसवायाश्रयाणामेकदा प्रत्यक्षासम्भवात् समवायस्य अप्रत्यक्षता।

नैयायिकमते समवायस्य प्रत्यक्षता कथम्

नैयायिकास्तु संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुतेति स्वीकारेणोक्तदोषवारणसम्भवात् समवायस्य प्रत्यक्षतामेवाभ्युपगच्छन्तीति दिक्।

CC-O. In Public Domain. Sri Vidyabharathi Book Centre, Sringeri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रश्नः ७६—अभावप्रत्यक्षे योग्यानुपलब्धिः कारणत्वेन प्रतिपादयत ।

उत्तरम्—अभावप्रत्यक्षे योग्यानुपलब्धिः कारणम् । तथाहि—भूतलादौ घटादिज्ञाने जाते घटभावादिकं न ज्ञायते । तेनाभावप्रत्यक्षे प्रतियोगि-प्रत्यक्षाभावः कारणम् । तत्र, योग्यताऽप्यपेक्षिता सा च प्रतियोगिसत्त्वप्रसंजन-प्रसञ्जितप्रतियोगित्वरूपा तदर्थश्चायम्—प्रतियोगिनः=घटादेः सत्त्वस्य=सत्तायाः प्रसञ्जनम्=आरोपः इति प्रतियोगिसत्त्वप्रसञ्जनम् 'यद्यत्र घटः स्याद्' इत्याकारकः तेन प्रसञ्जितः=आरोपितः प्रतियोगी=तर्हि उपलभ्येत इत्यारोपविषयो घटोपलम्भः=घटप्रत्यक्षं तदेव प्रतियोगी यस्य सोऽभावप्रत्यक्षे हेतुः । तथाहि—यत्रालोकसंयोगादिकं वर्तते तत्र 'यद्यत्र घटः स्यात्तर्हि चक्षुषो-पलभ्येत 'इत्यापादयितुं शक्यते । तेन तत्र घटाभावादेः चाक्षुषं प्रत्यक्षं भवति । अन्धकारे तु नैवमापादयितुं शक्यते । तेन घटाभावादेरन्धकारे न चाक्षुषं प्रत्यक्षम् स्पार्शनप्रत्यक्षं तु भवत्येव आलोकसंयोगं विनापि स्पार्शनप्रत्यक्षस्या-पादयितुं शक्यत्वात् । गुरुत्वादिकं यत् प्रत्यक्षायोग्यम्, तदभावस्तु न प्रत्यक्षः । तत्र गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वात् ।

एवञ्च संसर्गाभावप्रत्यक्षे सर्वत्रापि प्रतियोगिनो योग्यताऽपेक्षिता भवति । अन्योऽन्याभावप्रत्यक्षे तु अधिकरणयोग्यताऽपेक्षिता न तु प्रतियोगियोग्यता । अतः स्तम्भादौ पिशाचादिभेदोऽपि चक्षुषा गृह्यत एव, पिशाचे तु स्तम्भभेदस्य न प्रत्यक्षत्वं पिशाचरूपस्य भेदाधिकरणस्यायोग्यत्वादिति दिक् ।

प्रश्नः ७७—अलौकिकः सन्निकर्षः कतिविधः ? इति सोदाहरणं सोप-पत्तिकं निरूपयत ।

उत्तरम्—अलौकिकः सन्निकर्षस्त्रिविधः । सामान्यलक्षणः, ज्ञानलक्षणः, योगजश्चेति । तदुक्तं मूले—

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ।।

अत्र व्यापारः=सन्निकर्षः । तत्र सामान्यलक्षणस्तावत्—सामान्यं लक्षणं=स्वरूपं यस्य स इति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ननु सामान्यलक्षणस्तावत्—सामान्यं लक्षणं स्वरूपं यस्य स सामान्यलक्षणो व्यापार इति स्वीकारे सामान्यरूपा प्रत्यासत्तिरिति लभ्यते। सामान्यस्वरूपं च इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं बोध्यम्। तथा च यत्रेन्द्रियसंयुक्तो धूमस्तद्विशेष्यकं ज्ञानं धूम इति तत्र ज्ञाने प्रकारीभूतं धूमत्वं तेन सन्निकर्षेण सकलधूमविषयकं ज्ञानं जायते इति। अत्र सामान्यपदेन समानानां भावः सामान्यमिति व्युत्पत्त्या धर्ममात्रं गृह्यते, न तु जातिमात्रम्। एवञ्च यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र सामान्यलक्षणसन्निकर्षेण सर्वेषां तद्घटवतां स्मरणं न स्यात्, घटरूपसामान्यस्य तदानीमभावादिति चेन्न, सामान्यं लक्षणं विषयो यस्य स सामान्यलक्षण इति स्वीकारेण सामान्यज्ञानस्वरूपप्रत्यासत्तेर्लाभेन घटरूपसामान्यस्याभावेऽपि तज्ज्ञानरूप-प्रत्यासत्तेः सत्त्वेनादोषात्।

ज्ञानलक्षणः

ज्ञानलक्षणसन्निकर्षश्च ज्ञानरूपो यथा—सुरभिचन्दनमि'त्यत्र सौरभस्य ज्ञानं ज्ञानलक्षणसन्निकर्षेणैव। यद्यपि सामान्यलक्षणयाऽपि सौरभस्य भानं सम्भवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणयैव।

योगजः

योगजसन्निकर्षो योगाभ्यासजनितो धर्मविशेषः श्रुति-स्मृति-पुराणादिप्रति-पाद्यः। तेन चातीतानागतविप्रकृष्टादिज्ञानं योगिनो भवति। स च युक्त-युञ्जान-भेदात् द्विविधः योगिद्वैविध्यात् तद्धर्मस्यापि द्वैविध्यम्। इति दिक्।

प्रश्नः ७८—सामान्यलक्षण-ज्ञानलक्षणयोः को भेदः ? तदन्यतराऽस्वीकारे का हानिरिति स्पष्टं प्रतिपादयत ?

उत्तरम्—ननु यदि सामान्यलक्षणा-प्रत्यासत्तिर्ज्ञानरूपा, ज्ञानलक्षणापि-ज्ञानरूपैव तदा तयोर्भेदः कथमिति चेन्न, सामान्यलक्षणाप्रत्यासत्तिर्हि सामान्य-श्रयस्य ज्ञानं जनयति, ज्ञानलक्षणा तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति तयोर्भेदात्।

सामान्यलक्षण-ज्ञानलक्षणयोः सार्थक्यम्

प्रत्यक्षे सन्निकर्ष विना [illegible] सामान्यलक्षणा विना

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

धूमवत्त्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च भानं न भवेत्तदर्थं सामान्यलक्षणास्वीक्रियते। न च सकलवह्निधूमभानाभावे का हानिरिति वाच्यम्, प्रत्यक्षधूमे वह्निसम्बन्धस्य गृहीतत्वात् अन्यधूमस्य चानुपस्थितत्वात् धूमो वह्निव्याप्यो नवेति संशयानुपपत्तेः। अतः सामान्यलक्षणाया अस्वीकारेण 'धूमो-वह्निव्याप्यो न वा' इति संशयानुपपत्तिरेव महती हानिः। सामान्यलक्षणा स्वीकारे तु तेन सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसन्देहः सम्भवति। सामान्यलक्षणसन्निकर्षेण प्रमेयत्वेन सकलप्रमेयज्ञाने जाते हि सार्वज्ञन्तु न शङ्कनीयम्। विशिष्यसकलपदार्थानामज्ञातत्वेन सार्वज्ञाभावात्।

एवं च ज्ञानलक्षणाया अस्वीकारे 'सुरभिचन्दनमि'तिज्ञाने सौरभस्य भानं कथं स्यात्। यद्यपि सामान्यलक्षणयाऽपि सौरभस्य भानं सम्भवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणयैव। तथा च यत्र धूमवत्त्वेन धूलीपटलं ज्ञातं तत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया।

एवं च सामान्यलक्षण—ज्ञानलक्षणयोरुभयोरपि स्वीकरणं समुचितमेव, नान्यतरस्वीकारेण गतार्थतेति दिक्।

प्रश्नः ७९—सामान्यलक्षणः कः? तत्र सामान्यपदस्य लक्षणपदस्य च कोऽर्थः? तस्य स्वरूपं किम्? तेन कुत्र कीदृशं ज्ञानं जायते? कथं च सामान्यज्ञानस्य सामान्यलक्षणत्वम्?

उत्तरम्—अलौकिकसन्निकर्षः सामान्यलक्षणः। समानानां भावः सामान्यमिति व्युत्पत्त्या सामान्यपदस्यार्थः धर्ममात्रं गृह्यते न तु जातिमात्रम्। सामान्यं च इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं बोध्यम्। लक्षणपदस्य च स्वरूपमर्थः। तथा च सामान्यं लक्षणं=स्वरूपं यस्य स इति व्युत्पत्त्या सामान्यलक्षणो व्यापार इति स्वीकारे सामान्यरूपा प्रत्यासत्तिर्लभ्यते। तथा च यत्रेन्द्रियसंयुक्तो धूमस्तद्विशेष्यकं ज्ञानं धूम इति तत्र ज्ञाने प्रकारीभूतं धूमत्वं तेन सन्निकर्षेण सकलधूमविषयकं ज्ञानं ज्ञायते।

वस्तुतस्तु लक्षणपदस्य विषयोऽर्थः। ततश्च सामान्यं लक्षणं विषया यस्य स सामान्यलक्षण इति स्वीकारेण सामान्यज्ञानस्वरूप-प्रत्यासत्तेर्लभिन घटरूप-सामान्यस्याभावेऽपि तज्ज्ञानरूपप्रत्यासत्तिरिति लभ्यते।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तेन तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र तद्घटात्मक-सामान्यस्याभावेऽपि तद्घटविषयकज्ञानरूपसामान्यलक्षणेन सर्वेषां तद्घटवतां स्मृतेरुपपत्तिरिति दिक् ।

प्रश्नः ८०—ज्ञानलक्षणा का सा किं स्वरूपा ? तस्याः सन्निकर्षत्वाङ्गीकारे च का युक्तिः ? योगजसन्निकर्षस्य च कस्मिन् पदार्थेऽन्तर्भावः ?

उत्तरम—अलौकिक प्रत्यासत्तिर्ज्ञानलक्षणा । सा च स्वयंयुक्तमनः संयुक्त-मनः संयुक्तात्मसमवेतज्ञानविषयत्वरूपा ।

ननु सामान्यलक्षणसन्निकर्षेणेव सुरभिचन्दनमिति ज्ञाने सौरभस्य भान-सम्भवे ज्ञानलक्षणायाः सन्निकर्षत्वांगीकारो न समीचीन इति चेन्न, सुरभि-चन्दनमिति ज्ञाने सामान्यलक्षणसन्निकर्षेण सौरभस्य भानसम्भवेऽपि ज्ञान-लक्षणयैव तत्र सौरभत्वस्य ज्ञानसम्भवात् ।

योगजसन्निकर्षस्य श्रुतिस्मृतिपुराणादिप्रतिपाद्य योगाभ्यासजनितधर्मविशेष-रूपस्य गुणपदार्थेऽन्तर्भाव इतिदिक् ।

इति मिथिलाञ्चलीय—मधुवनीमण्डलान्तर्गतढंगा—हरिपुर—बरूशीटोलस्थ शारदामन्दिर सं० विद्यालयप्रधानाध्यापकेन बरूशी श्रीजयकान्त झा शर्मणा सम्पादितं प्रत्यक्षखण्डम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मूल्य 5-00

Sri Vidyabharathi Book Centre, Sringeri

भारतीय विद्या प्रकाशन
वाराणसी • दिल्ली